नं: २१६-घ

काव्यप्रकाशटीका - १ - २
उल्लास पत्राणि ३१

नं०: २१५-घ
काव्यप्रकाश टीका - १-२-उल्लास:
पत्राणि ३१

काव्यप्रकाशटीका २उल्लास:

नं०: २१५ - घ

३१ पत्राणि

नं०: २१५-घ
काव्य प्रकाश टीका १-२ उल्लास:
पत्राणि ३१

नं०: २१५-घ
काव्य प्रकाश टीका १-२-उल्लास:
पत्राणि ३१

नं. २१७५
काव्यप्रकाश
टीका
३१ पत्राणि

काव्यप्रकाशटी प.१

काव्य० ॥:::॥श्रीलम्बोदरायनमः॥ ॥:::॥ ॥रघुवंशजलधिचंद्रंरावणवनदग्निपारीन्द्रं॥सीतावि-
पिनमयूरीमुदिरमुदारंमहःकलये॥मौलौनिधायपाणीवाणीमनिशंनमस्कृत्य॥पंडितरा-
जःकुरुतेटीकांकाव्यप्रकाशस्य॥इयतापिबुद्धिविभावेनमोहतोयदमुष्यभावशानवर्णनो-
१ द्यमः॥अपिसत्सुसत्सुगुणभारगौरवादरधेहिवाणिकरवाणिसाहसं॥वालिशादपिवक्रहृ-
दःकुलिशादपिकठिनकर्म्मणः॥गरलादपिमर्म्मभिदोयेकेचनतान्नमस्कुर्म्मः॥हरमौलि-
गलितगंगावीचिविचित्राशयाःसुधियः॥मत्कृतिमतिदीर्घदयादृक्पातसुधारसेनसिंचंतु॥
॥ ॥प्रथमतःप्रेक्षावत्प्रवृत्तिनिमित्तत्वेनप्रयोजनाभिधेयसंबंधस्याभिधातुमुचितस्यानभि-
धानाभारतीस्तुतिनत्यात्मकमंगलस्यसमाप्तौव्यभिचारात्फलांतरस्याभावादफलस्योपनि- १
व बंधनाच्चग्रंथकर्त्तुर्भ्रांतत्वेनानादेयवचनत्वशंकांनिराकृत्यप्रथमश्लोकमवतारयति॥ग्रंथारं-
भइति॥तत्तत्संदर्भविशेषविशिष्टोवाक्यसमूहोग्रंथः॥विघ्नविघातायेत्यनेनसमाप्तौव्यभि-
चारोपिविघ्नध्वंसेनतत्प्रसंगइतिध्वनितं॥प्रतिबंधकाभावसंपादकतयाप्रयोजनाभिधे- पंडित०टी

यसंबंधानभिधानेप्युपनिबंधनमादौनानुचितमितिचस्फोरितं॥समुचितेति॥ग्रंथारंभेकर्म्मि
णिप्रारिप्सिते भारत्याःअसाधारण्यात्समुचितत्वं॥इष्टत्वंचग्रंथकर्तुरुपास्यत्वात्एताभ्यांचदे
वताविशेषणाभ्यांसाधारणोपास्यगणेशादिभ्योभारत्याःस्तुत्यादिनिमित्तत्वेलक्षणयमुपदर्शि
तं॥ग्रंथकृदित्यनेनाभ्रांतत्वमाविष्कृतं॥परामृशतीतिस्तौतीति॥लक्षणयाज्ञानविशेषविशिष्टवा
ग्व्यापारस्यस्तुतित्वेनज्ञानस्यापिस्तुतित्वादितिभावः॥यद्वाप्रतिसंधत्तेसर्वोत्कृष्टत्वेनेतिः
शेषः॥तस्यैवस्तुतित्वान्नमस्काराद्भेदकत्वाच्चेतिभावः॥नमस्करणीयत्वेनस्मरतीत्यन्ये॥स
मान्यशब्दस्यविशेषपरत्वेलक्षणापत्तेरनुपादेयमेतत्॥ ॥नियतीति॥कवेर्भारतीकाव्य
ात्मिकाजयतिउत्कर्षेणवर्त्ततइतियोजना॥नचकाव्यात्मिकायास्तस्यानदेवतात्वमितिन
तत्स्तुतिर्विघ्नविघातायुपयोगइतिवाच्यं॥ध्वनिवर्णात्मिकायास्तस्यादेवतात्वस्यागमसि
द्धत्वात्ध्वन्यादीनांतदास्पदत्वेनाभिन्नत्वाध्यवसायेनस्तुतेःप्रकृतोपयोगादितिभावः
नचकवेरितिव्यर्थंभारत्याःकाव्यरूपत्वलाभायतद्विशेषणात्॥अतएवकवेर्निर्मितिः॥

पंडित

मादधतीत्यपप्यारव्यानं कविवाङ्निर्मितिरिति वृत्तिविरोधादिति भावः॥ वस्तुतस्तु भारतीपदं

लक्षणया शब्दाधिष्ठातृदेवतापरमिति नानुपपत्तिः नच कविपदवैयर्थ्यं गंभीरायां नद्यां घो

षः प्रवसतीत्यत्रेव वाक्यार्थस्य ससंबंधित्वेन प्रतीतेरुद्देश्यत्वात् नच तदप्यप्रयोजकं शिवा

२ दिमंत्राधिष्ठातृदेवतावैलक्षण्येन प्रतीतेः असाधारणोपासनावीजत्वेनापेक्षितत्वादिति

परमार्थस्तस्तु शब्ददेवतोभयोपस्थितो भारतीपदनानार्थमेव प्रयोगसाम्यविनिगमनाविर

हात् कवेरित्याराध्यत्वं जन्यत्वं च संबंधः उपादानप्रयोजनं च देवतांतरवैलक्षण्यबुद्धिरे

वेति॥ निर्मितिमिति॥ निर्माणं कुर्वाणेत्यर्थः॥ नच निर्माणप्राधान्ययोः पौनरुक्त्यं निर्मा

णपदस्य प्रकृष्टनिर्माणपरत्वेन सामान्यविशेषभावात्॥ निर्मितिकर्तृत्वं समानो धर्मः तत्र २

ब्रह्मणो भारत्या वैलक्षण्यायतन्निर्मितिं विशिनष्टि नियतीत्यादिना यद्यपि निर्मितिजन

कत्वमुभयोर्नैकं ज्ञानोपादानयोर्भेदात् तथापि तत्पदवाच्यज्ञानजनकत्वमेकमेवेति नात

पर्यं नियम्यते सौरभादिकमनेनेति नियतिरसाधारणो धर्मः कमलत्वादिः कार्यतावच्छे राजटी

दकः कारतावच्छेदकश्च पंकत्वादिस्तत्कृतो यो नियमः तद्रहितां ब्रह्मणो हि पद्मत्वावच्छि-
न्नपंकत्वावच्छिन्नेनैव निर्मीयते न तु भारत्यापीत्यर्थः नियमराहित्यमसंभवि कविप्रसिद्ध्यादि-
नियमस्य भारतीनिर्मितौ पेक्षणादिति विशिष्ट नियमराहित्यमुक्तं॥ नियतिरदृष्टं वा यद्यपि-
भारतीनिर्मितेरप्यदृष्टापेक्षा तथापि कर्मस्वजनकादृष्टापेक्षा नेति विशेषः॥ वस्तुतः प्रथ-
मव्याख्यानमेव सम्यक्॥ ह्लादैकमयीमिति एकं प्राचुर्येण प्रस्तुतं यस्याः सैकमयी ह्लादेनैक-
मयी ह्लादैकमयी अन्यथा ह्लादश्चासावेकश्चेति ह्लादैकस्तन्मयीमित्यर्थे पूर्वकालैकेत्यादि-
सूत्रेणैकशब्दस्य पूर्वनिपातापत्तेः॥ प्रांचस्तु एकशब्दो विजातीयव्यवच्छेदार्थकः तथा च
ह्लादमात्रमयीत्यर्थेण पूर्वनिपातशंकैकशब्दस्येत्याहुः॥ अनन्यपरतंत्रामिति अन्यो भार-
त्यपेक्षया कविरेव तस्मात्परः कविभिन्नस्तत्तंत्राभिन्नेत्यर्थः कवितंत्रत्वमभिमतमेवेति भ-
वः॥ यद्वा परतंत्रसमुदाय एवाप्रतुवचनः नहितरानरूढीतेदिक् पराधीनवृत्तिरितिव-
दत्रान्यः कविभिन्नस्तदायत्ताभिन्नेत्यर्थः॥ नवरससरुचिरामिति नवरसैरुचिरां चेत्यर्थः॥

पंडित अतोनसमाहारस्तथासतिनवरसीरुचिरामितिस्यात्॥वस्तुतोनवभीरसैरुचिरामितितृतीया
तत्पुरुषएवसमासः॥त्रिगुणरुचिरइतिवत् अतएवनचद्वन्द्वैवेतैरितिवैरस्तद्गुणाभिधा।
नेवृत्तिरपीति॥अत्रनवरसशब्दप्रतिपाद्यवत्तयारसवत्वमुभयत्रततोभारतीनिर्म्मितोनवर
३ साद्भुतरत्नखण्डेवेतिव्यतिरेकइत्यवधेयं॥अत्रानुपदर्शितेप्रतियोगिनिभारतीनिर्म्मितेरु
त्कर्षःकथंप्रतीयतेतिप्रतियोगिभूतांब्रह्मनिर्मितिमुपदर्शयतिवृत्तिकारःनियतिशक्त्ये
तिनियतिरसाधारणोधर्म्मःकारणतावच्छेदकादिस्तस्यशक्तिर्नियामकत्वंतदवच्छेदेनैव
कार्य्यकारणभावग्रहणात्तेनपंकत्ववच्छिन्नेनैवनियतरूपावच्छिन्नत्वावच्छिन्ननिर्म्माणमित्य
र्थः॥सुखदुःखेतिसत्वरजस्तमोरूपगुणत्रयात्मकत्वाद्विश्वस्येतिसांख्यमतेनेदंएकस्या। ३
मेवकामिनीतनौसंयोगेवियोगेप्रार्थनायांचसुखादयोऽनुभवसिद्धाइतिसांख्याः॥परम
ाण्वादीत्यादिउपादानंसमवायिकर्म्मस्पन्दःतत्कर्म्मभ्रमणंसंयोगेसतिकार्य्योत्पत्तेःकारण।
तिप्रत्येकान्वयितथाचपरमाण्वादिद्यत्समवायिकारणंकर्मादिद्यत्सहकारिकारणंनिमि। राजटी०

त्रासमवायिरूपं तन्त्रं त्रेत्यर्थः॥ न च हृद्यैवेति यद्यपि बीभत्सादिरसस्य प्रकृतेऽपि न हृद्यता तथापि
काव्योपनिरुद्धस्य विभावादितिरभिव्यक्तस्य तस्याह्लादकत्वमेवान्यथा रसत्वमेव तस्य न स्यादि
ति भावः॥ अत्र भावानुशिष्टक्तिनप्रत्ययान्तनिर्मितिपदस्य निसृष्टज्ञानवाचित्वप्रसिद्धेरुत्पाद
नकर्तृत्वं ब्रह्मणि विरुद्धं वप्रतीतिकमिति भावकरणे भयानुशिष्टल्युट्प्रत्ययान्तेन व्याचष्टे।
निर्मितिर्निर्माणमिति॥ एतद्विलक्षणत्वं चितितत्त्वे विलक्षणं नियतिकृतीत्यादिना दर्शितदर्शि
तमेवेति भावः॥ कविवाङ्निर्मितिरित्यत्र वाक्पदस्य पूर्ववदुभयपरत्वमेव॥ अत एवेति यतो भ
ारती निर्माणं ब्रह्मनिर्माणापेक्षया विलक्षणमतो भारती जयत्यर्थो ब्रह्मण उत्कर्षेण वर्त्तत इ
त्यर्थः॥ स्तुतेरमंगलत्वादाह जयत्यर्थेनेति॥ यद्यपि ध्रुवाद्युन्याशंकायामाह जयतीति इदं च न
टिरूपं अन्यथाऽसिद्धत्वेन नमस्कारानाक्षेपकत्वादिति भावः॥ आक्षिप्यते व्यज्यते वस्तु बोद्ध
व्यादिसहकारात् न त्वनुमीयत इत्यर्थः॥ काव्ये अनुमित्यपेक्षया व्यंजनोपस्थितेश्चमत्कारक
ारित्वमित्यग्रे वक्ष्यमाणत्वादित्यर्थः॥ केचित्तु एतादृशे गुरुकर्म्मणि पेक्षाकारिणमवश्यं देव

पंडित

ताप्रणामो दृश्यते तत्कथमत्र ग्रंथकृता स्तुतिमात्रमाचरता न कृतः कृतो वा कथं नोपनिबद्ध
इत्याशंकायां जयतीत्यादिग्रंथमवतारयंति तथा च स्तुत्यैव नत्याक्षेपात्पृथङ्नतिर्नोपनिबद्धे-
ति भाव इति ॥ इदं तु न सम्यक् नतिवत्स्तुतेरपि मंगलत्वादेतादृशपर्य्यनुयोगानवकाशाद-
दन्यथा नतिनिबंधनेप्येतादृशपर्य्यनुयोगादुभयनिबंधनं सर्वत्र प्रसज्येत यदपि नमस्का-
ररूपस्य वस्तुनो व्यंग्यत्वे ध्वनित्वं नेत्युक्तं तदपि तुच्छं वस्तुनो व्यंग्यत्वे ध्वनित्वस्याग्रे दर्शयि-
ष्यमाणत्वादिति तां प्रत्यस्मीत्यादि नियन्ताकारप्रदर्शनमभीष्टतमत्वसूचनायेति ॥ तद-
नेन देवतास्तुतिरूपमंगलमाचरता ग्रंथकृता भारतीरूपमभिधेयमपि दर्शितं स्तुत्यनुभाव-
व्यंग्या भारतीरतिरलक्ष्यक्रमव्यंग्यभेदः ॥ ब्रह्मापेक्षया व्यतिरेकालंकारेण नमस्कारात्मकं
च वस्त्विति त्रिविधेन व्यंग्येन त्रिविधं काव्यस्य व्यंग्यं भवतीति सूचितं ॥ अथ प्रेक्षाकारिप्र-
वृत्तिनिमित्तं प्रयोजनप्रतिपाद्यसंबंधस्य प्रदर्शनीयत्वे प्रकृतग्रंथस्य काव्यांगतया तत्प्र-
योजनेनैवास्यापि प्रयोजनित्वमित्यभिप्रायेण काव्यप्रयोजनप्रदर्शकं ग्रंथमवतार

५ ५ राजटी०

यतिइहेति ॥ इह पूर्वश्लोके यदभिधेयं भारतीस्वरूपेण निर्दिष्टं तत्सप्रयोजनं वक्ष्यमाणप्रयोज
नकमित्यर्थः ॥ तथा चाभिधेयस्य पूर्वं निर्दिष्टत्वात्तदंशोऽनुवादः प्रयोजनांशस्त्वभिधानमत एव
वेतिशब्दोपादानमन्यथाऽभिधेयं सप्रयोजनमाह तावदेव ब्रूयादिति ॥ पूर्वश्लोकस्य चाभि
धेयोपस्थापकत्वं भारतीपदस्य शब्दपरत्वे संमुखमेव स्वरूपेण यात तदधिष्ठातृदेवतापरत्वे
संबंधघटकत्वेन क्वचिदजहत्स्वार्थायां संबंधस्यापि प्रकारत्वात् काकेभ्यो दधीत्यादौ द ।
ध्युपघातकत्ववत् नानार्थत्वपक्षे शक्त्या व्यंजनया वेति स्मर्तव्यं ॥ यशसे इति चतुर्थी तादर्थ्ये
एवमग्रेऽपि कृत्प्रभृतयः संपाद्यादित्वात् क्विबंताः ॥ शिष्यहितैषितया दृष्टांतत्वाद्वा काव्य
स्य यशः प्रभृतिकारणतां स्फुटयति कालिदासादीनामिवेति श्रीहर्षादेरिति पंचमी ॥ य
द्यपि कालिदासस्यापि धनं धावकस्यापि यश इति प्रत्येकं दृष्टांतासंगतिः ॥ तथापि प्राधा
न्याभिप्रायेण विभागः ॥ अनर्थनिवारणं अनिष्टनिवारणं सर्वत्र यत्काव्यं करोति सर्वथ
तत्र यतनीमित्यग्रेतनेनान्वयः ॥ व्याख्येयपदक्रममनादृत्य द्वितीयमर्द्धं व्याचष्टे सकले

पंडित तिपरशब्दार्थोऽयं ॥ सद्यः पदार्थमाह समनंतरमेवेति ॥ विगलद्वेद्यांतरे सुखे विगलद्वेद्यांतरां सामग्री i
माह रसास्वादनेति स्थायिभावपरामर्शेण तन्मनभिव्यक्तं वा यद्वा रसास्वादनं च तत्समु न्य
द्भूतं चेत्यर्थः ॥ तथा च रसास्वाद आस्वाद्यमानो रसः सुप्रकाशसुखात्मक आनंदः अयं च
५ विभावादिपरामर्शित्वा वाक्यार्थे वोत्पद्यत इति ॥ विगलितेतेति यद्यपि संवेदनमात्रमेव
5 सुविषयमात्रपर्यवसन्नं तथाप्यत्रानुषंगिकोऽपि न विषयांतरस्पर्श इति भावः निर्वृतिप
दार्थमाह आनंदमिति ॥ वाक्यत्वाविशेषेऽपि एतादृशं सुखं वेदादिभ्यो नेत्याह प्रभुसम्मितेत्य
ादि प्रभुतुल्येत्यर्थः एतदेवाह शब्दप्रधानेति शब्दप्राधान्यं च तत्प्रतिपादितेऽर्थे नियोज्यस्य
त स्वेष्टसाधनत्वविचाराभावः प्रभुणा हि त्वमेवं कुर्वित्यादिष्टो नियोज्यः स्वेष्टं न किंचिद्विचा ५
रयति सिद्धवदेव प्रवर्त्तते कदाचिदनिष्टसाधनेऽपि एवं वेदेनापि नियुक्तस्य संध्यामुपासी
तेत्यादौ निःफलेऽपि प्रवृत्तेरुभयोः साम्यमित्यर्थः शब्दानुपस्थाप्यार्थान्वयमात्रतात्पर्यकत्वं
प्राधान्यमिति मान्याः ॥ सुहृत्सम्मितेति अर्थतात्पर्यवत्त्वं सिद्धार्थोपस्थापकत्वं सुहृदप्य राजटी०

स्मिन्नर्थे इदमित्थमनित्थं वेति बोधयति न त्वाज्ञापयतीति तथा पुराणमपि सिद्धार्थकतयेत्या-
र्थः ॥ कथमेताभ्यां वैलक्षण्यमत आह शब्दार्थयोरिति एतदेव कुत इत्यत आह रसांगभूते-
ति रसांगभूतो रसोपस्थापको व्यापारो व्यंजनात्मकस्तु प्रेरणायां तदुपसर्जनतया तन्निष्पाद्य न
रसाभिव्यक्तिनिष्पादकतयेति यावत् तदर्थमुपात्ततयेति मिश्राः ॥ तत्रापि तदुपस्थाप्यार्थ
ोपस्थित्यर्थमुपात्तत्वमित्यर्थः ॥ यशःप्रभृतिजनकतावच्छेदकं काव्यपदार्थमाह लो-
कोत्तरेति कविकर्म्म कविव्यापारः काव्यमित्येतावति कृते रथ्यादिगोचरकर्मणि गतम-
त उक्तं लोकोत्तरेत्यादि वर्णनेति शब्दादभिधेयोपस्थितिर्वर्णना तत्र निपुणं जनकमेता-
वता शब्दरूपो व्यापार इति सिद्धं इदं च कविप्रयुक्तकाव्याभासेपि गतमत उक्तं लोकोत्तरे-
ति लोकोत्तरा चमत्कारिणी रसोपस्थापिकेति यावत् तथा च रसोपस्थापकाभिधेयार्थोप-
स्थापकं वाक्यं काव्यमिति पर्यवसितोर्थः ॥ मिश्रास्तु वर्णना रसोपस्थितिर्लोकोत्तरा चम-
त्कारकारिणी तया च चमत्कारि रसोपस्थितिजनकं वाक्यं काव्यमिति लक्षणार्थमाहुः

पंडित

६ 6

ऽत्रापि रसोपस्थितेश्चमत्कारित्वविशेषण एवेयथादुक्त एवार्थः ॥ केचित्तु लोकोत्तरवर्णना
निपुणस्य कवेरसाधारणं वर्णनात्मकं मैकर्मेत्यर्थमाहुः ॥ सर्वत्रावच्छेदकतया र्थोपि लक्ष
णप्रविष्टोतः शब्दार्थयोः काव्यत्वं प्रतिपादयताऽग्रिमलक्षणेन विशेष इति स्मर्तव्यं ॥ कं
तासम्मिततयेत्यादि व्याचष्टे तत्कांतेवेति अयमर्थः यथा कामिनी रूक्षानपि विषयविमु ङ्गा
खानपि पुरुषान कटाक्षभुजक्षेपादिना सरसतामापाद्याभिमुखी करोति एवं काव्यमपि
स्वभवतः सुकुमारानपि नीति शास्त्रपरांमुखानपि सरसतापादनेनाभिमुखी करोति ग्राहय
ति च प्रकृतोपि देशं तथा चोक्तं स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुंजते ॥ प्रथमालीढमा
धवः पिबंति कटु भेषजमिति ॥ मिश्रास्तु कटाक्षादि रसांगभूत व्यापार प्रवर्त्तनतया सरस ६
तापादनेनाभिमुखीकृत्यानंदयति तथा काव्यमपीति पूर्वेणैवान्वय इत्याहुः ॥ रामादिव
दिति नायकवद्वर्णितव्यं न तु प्रतिनायकवदित्यर्थः ॥ तेन वामनकृतोपि छलेन बलिबंधो
हेय एव ॥ रवणकृतो हरनमस्कारादिरुपादेय एव तयोः प्रतिनायकधर्मतया वर्णनीयत्वा राजटी०
ब्रह्मणा बालिवधो हेय एव २ पाठः

दिति भावः ॥ यथायोगमिति यथायोग्यमित्यर्थः ॥ ननु काव्यप्रयोजनानि कवेरेवोचितानि ।
व्यवहारज्ञानानंदोपदेशास्तु कवेः सुकृतकाव्यादनुपपन्ना इत्यत आह सहृदयस्य चेति तथ
चैतावत्सु प्रयोजनेषु काव्यस्य कारणत्वं तत्र यशःप्रभृतीनि कवेर्व्यवहारज्ञानादीनि सहृद
यस्येति न काचिदनुपपत्तिरिति ॥ सर्वथेति प्रयोजनप्राचुर्यादित्यर्थः ॥ प्रवृत्तेः स्वभावादु
पायविषयत्वेन उपायजिज्ञासायामुपायोपदेशकं ग्रंथमवतारयति अस्येति यशःप्रभृति
प्रयोजनजनककाव्यस्येत्यर्थः ॥ ननु मीमांसकानां शक्तिः पदार्थांतरं नैयायिकानामीश्व
रेच्छा तत्र केयमित्यत आह कवित्वबीजभूत इति देवतानुग्रहजन्यः पदपदार्थस्मृतिहेतु
र्भावनाख्यः इत्यर्थः ॥ तदुक्तं मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य ॥ अ
क्लिष्टानि पदानि च विभांति यस्यामसौ शक्तिः ॥ कारणता आह कव्यतिरेकसहचारमाह यं
विनेति एतदेव दृढयति प्रसृतं वेति यत्प्रसृतं घटपटादि तदुपहसनीयं न काव्यमित्यर्थः
अन्यथा कारणं विना कार्योत्पत्तेरशक्तिसंभवादिति भावः ॥ केचित्तु काव्यपदं वर्णना ।

पंडित सामान्यपरं न प्रसरेदित्यत्र प्राय शब्द इति शेष इत्याहुः ॥ तन्न यशःप्रभृतिप्रयोजनजनकस्य
लोकोत्तरेत्यादिना लक्षितस्याकारणाभिधानप्रस्तावे वर्णनात् सामान्यकारणाभिधानस्यसं
दर्भविरुद्धत्वात् प्रायःपदस्यानियमार्थकतयाकारणताग्राहकत्वाभावाच्च नियतान्वय॥
७ व्यतिरेकयोरेव तद्ग्राहकत्वात् ॥ अन्येतु अनुपहसनीयत्वविशिष्टं काव्यं शक्तिजन्यमेत
7 त्व्यतिरेकस्य काव्यस्वरूपपरिशेषाभावात् अनुपहसनीयत्वविशेषणाभावाच्च तत्राद्यं॥
दर्शयति यांविनेति द्वितीयमाह प्रसृतंवेति एवं च सति न काचिदनुपपत्तिरित्याहुः ॥॥
अपरे तु द्वयी शक्तिरेकोत्पत्त्यनुकूला अपरा प्रचयानुकूला तत्राद्या यामाद्यद्वितीया॥
यां द्वितीयं व्यतिरेकप्रदर्शनमिति न विरोधमित्याहुः ॥ इदमपि कारणशक्तिप्रस्तावे श ७
क्त्यंतरस्यानाकांक्षितत्वादनादेयमिति ॥ अथ दृष्टान्तं तमादाय व्याचष्टे लोकस्या॥
ति लोकपदस्य स्थावरेष्वप्रसिद्धेर्न्यूनत्वमाशंक्याह स्थावरेति तज्ज्ञानस्य काव्यानुप॥
योगादाह लोकवृत्तस्येति तथा च स्थावरजंगमात्मकलोकवृत्तस्येति लक्षणया पर्य्य राजटी०

वसितोर्थः॥ शास्त्रमात्रस्यानुपयोगात्संकोचयति छंदोव्याकरणेति काव्यव्यवहारे छंद
सः प्राधान्याददावुपादानं व्याक्रियते साधुत्वमनेनेति व्याकरणं पाणिन्यादि प्रणीतं लं
केश्वरादि प्रणीतं च ऽभिधानस्य नाम्नः कोषो ऽभिधानकोषः काव्यपदस्य सुकृत।
काव्यपरत्वे ऽन्योन्याश्रयदोषप्रसंगादाह महाकवीति अवेक्षणादिति व्याचष्टे विमर्शनादिति
निपुणतापदार्थमाह व्युत्पत्तिरिति वर्णनीयसमस्तवस्तुपौर्वापर्यपरामर्शकौशलमित्यर्थः॥
ऽभ्यासमाह काव्यमिति योजयितुं विचारयितुं कारिकास्थमिति शब्दं व्याचष्टे इतीति इति शा
ब्दोपादानात्समुदायोस्यते ऽन्यथा ऽभ्यासो हेतुरित्येव सम्यगिति भावः॥ ननु व्यस्ता इति अत्र
प्रांचः दोषाभावादिविशिषणविशिष्टशब्दार्थवृत्तिकाव्यत्वं कार्यतावच्छेदकं तदवच्छिन्नं च
शक्त्यादीनां प्रत्येकं स्वरूपयोग्यता मिलितानां फलोपधानं दंडचक्रादीनामिव घटे एवं च हे
तुरिति फलोपधानं हेतव इति स्वरूपयोग्यतार्थः तथा च त्रयः समुदिता हेतुर्न तु हेतवः व्यस्ता हे
तवो न तु हेतुरिति वाक्यद्वयमाद्ये फलोपधानत्वि धेयं स्वरूपयोग्यता निषेध्या सहकार्यभाव अ।

पंडित युक्तकार्य्याभाववत्तायाः तस्याः फलोपधानं कालेऽभावात् अन्योऽस्वरूपयोग्यताविघेयाफलोपा
धानन्निषेध्यमेवं च सति केवलशक्त्यादिसद्भावे तादृग्विशेषणविशिष्टकार्य्याभावो नान्वय
व्यभिचारायनहि केवलदंडसद्भावे घटाभावो दोषायेति तात्पर्य्यमित्याहुः ॥ मिश्रास्तु विशि
९ ष्टवृत्तिकाव्यत्वं न कार्य्यतावच्छेदकं नीलघटत्ववद्गौरवसंपन्नविशिष्टकार्य्यवृत्तित्वात् त
8 था च समुद्भवादौ कार्य्यत्रये शक्त्यादीनां त्रयाणां कारणत्वं तथाहि अर्थावच्छिन्नशब्दसात्रप्र
तिशक्तिः कारणं दोषापाककरणगुणनिवेशनरूपसमुल्लासे उक्तरूपा व्युत्पत्तिः अग्रि
माग्रिमकाव्यस्य झटित्युत्पादनरूपे निर्म्माणे अभ्यास इति प्रत्येकं कारणता तदुक्तं काव्यं
चा हि जायते शक्तेर्वर्द्धते ऽभ्यासयोगतः ॥ अस्यां स्तुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसी ॥ एतच्च वृत्ति ९
कृदपि निर्म्माणे चेति चकारेणाव्यक्तो चकार तथा त्रयः समुदिता इत्यादेरयमर्थः ॥ त्रयः स
मुदिता व्यवशान्मिलिता इत्यर्थः ॥ अतएव न व्यस्तास्तस्य काव्यस्य समुद्भषादौ हेतुस्तादृग्वि
शिष्टकार्य्यं प्रति पूर्ववर्त्तिनो न हेतवः न प्रत्येकं कार्य्यकारणानि तदानीमेकैकाभावा राजटी०

दिति ॥ अत्र यशःप्रभृतिजनकतावच्छेदकं काव्यत्वं विशिष्टवृत्त्येव न च काव्यार्थिनां शास्त्र
ादौ प्रवृत्त्यनुपपत्तिः विशिष्टकाव्यार्थिनां तत्कारणेषु प्रवृत्तेरविरोधात् प्रवृत्तेस्ते हि नीरस
घटाधीनयोः कारणेष्विति ॥ प्रसंगात्कारणमुक्त्वा संप्रति काव्यपदप्रवृत्तिनिमित्तलक्षणमा
हेत्याह एवमिति स्वमसाधारणं रूपं लक्षणमित्यर्थः ॥ न च लोकोत्तरेत्यादिना काव्यपदार्थ
ाभिधानादस्यानुपयोगतेति वाच्यं तस्य लक्ष्यतावच्छेदकत्वेनोपलक्ष्यत्वादिति भावः ॥ प्राञ्च
स्तु पूर्वोक्तलक्षणस्य धर्मिणमाहेत्याहुः अत्र व्यंजनाश्रयतया शब्दार्थयोरुभयोरपि काव्य
त्वमिति द्वंद्वः ॥ तत्रापि शब्दस्य व्यवहारे प्राधान्यस्फोरणाय पूर्वनिपातः सदोषनिर्गुणनिरलं
कारेष्वतिव्याप्तिवारणाय विशेषणानि यद्यपि ग्रंथकारमते शब्दार्थयोर्निर्गुणालंकार
त्वमित्यसंभवः तथाप्यवच्छेदकतया तदाश्रयत्वमभिप्रेतं वने सिंहनाद इत्यत्र वनस्येवे
ति भावः ॥ केचित्तु नालंकारवत्त्वं लक्षणे विशेषणं क्वचिन्निरलंकारस्यापि मुनिर्जयति यो
गीन्द्र इत्यादे रसवत्त्वादेव काव्यव्यवहारात् ॥ तथा च दोषाभावादेः सत्यलंकाररसान्यतर

वत्त्वमेवकाव्यलक्षणमतएवनिर्दोषंगुणवत्काव्यमित्येवकाव्यलक्षणमुक्तमतएवमूलेऽनलं
कृतीइत्युक्तमित्याहुः॥तन्नसूक्तिसहंनीरसस्यकाव्यत्वेतत्रदोषाणामकिंचित्करत्वेनसदोषस्या
पिकाव्यत्वापत्तेःनीरसोहिनिर्बन्धोयःसोपिशब्दोमहाकवेः॥सतेनाकविरेवस्यादन्येनास्मृतल
क्षणइतिध्वनिकृतानीरसस्यकाव्यत्वनिषेधाच्चनापिनिरलंकारस्यकाव्यत्वंचमत्कारविशेष
जनकस्यकव्यतयाऽलंकारंविनातदभावात् तदुक्तंनकांतमपिनिर्भूषणंविभातिवनितामुख
मिति॥यत्तुनिरलंकारस्यमुनिर्जयतीत्यादेःकाव्यत्वमुदाहृतंतदप्यकचुतुकेमत्स्यकच्छपा
वस्थानस्यमाहात्म्यहेतुत्वप्रतीतेःकाव्यलिंगस्यातिशयोक्तेश्चविद्यमानत्वादयुक्तंनिर्दोष
मित्यादिराजलक्षणंतुगुणानामंतरंगत्वमलंकाराणांबहिरंगत्वंकाव्यव्यवहारइतिदर्शी
यितुं॥मिश्रास्तुगुणालंकारयोग्रंथकारमतेरसधर्मतयातदुपादानादेवरसवत्त्वेलब्धेदोष
ाभावोपिलब्धएवतेषांतद्विघातकत्वादेवमन्यत्रापीतिविशेषणवैयर्थ्यमाशंक्यरसोपस्था
पकंवाक्यंकाव्यमितिलक्षणंलक्षणार्थमिदंविशेषत्रयोपादानंशक्यतेत्रिभिरपिविशे

षणैरुपलक्षयितुं लक्षणमिति न वेयथ्याशंका यन्न दुःखेन संभिन्नमित्यादिना स्वर्गो लक्षणोप
लक्षणवदित्याहुः ॥ अत्र वाक्यपदेनार्थस्याप्युपलक्षणं अतः शब्दार्थयोः काव्यत्वं वदता मूलेन
गविरोधः ॥ अत्र विचार्यते एवं सति पूर्वलक्षणाद्भेदः तत्रापि वर्णनारसोपस्थितिः क्वचित्क
र्म्मिवाक्यात्मकमिति स्वयमेव व्याख्यानात् न च तत्र शब्दस्यैवोपादानमत्रार्थस्यापीति विशेष
ः तत्राप्यवच्छेदकतया तत्प्रवेशात् अन्यथाग्रिमग्रंथविरोधापत्तेः पूर्वलक्षणस्य प्रकृतावच्छेद
कत्वे अग्रिमलक्षणस्य हेतुत्वे स्वरूपासिद्धिप्रसंगाच्चेति ॥ अत्रायमाशयः लक्षणयोरभेद एव
व्य मूले वक्तुरेव लक्षणस्य वृत्तिकृता यशःप्रभृतिजनकतावच्छेदकत्वेन निःकृष्य प्रथममभि
धात् यशःप्रभृतिजनकतावच्छेदकशक्त्यादिजन्यतावच्छेदकलक्षणानां काव्यमित्यादिग्रंथे
वभेदावगमात् वक्तव्यलक्षणार्थस्यादावभिधाने दोषाभावात् नन्वप्रतियोगिन्यज्ञाते कथं
तज्ज्ञाने ज्ञेय एवं च गुणादिविशेषणज्ञानात् कथं तद्विशिष्टधीरत आह दोषगुणेति नन्वलं ।
काराभावस्य विशेषणत्वे सालंकारयोः शब्दार्थयोरव्याप्तिरतो मूले तथा च क्वापीत्यनेनेति

पंडित तथाचसालंकारत्वमेवविशेषणंतत्रस्फुटास्फुटालंकारवत्वादद्रष्टुमितिभावः॥स्फुटालंकारे
तितथाचनन्वेदृषदर्थेप्रयोगःसचास्फुटत्वमितिउक्तमर्थमुदाहरणेनद्रढयतियःकौमारहरइ
तिसएवहिवरइतितथाचोपभुक्तसंयोगेनोत्कंठाकारणमितिभावः॥उन्मीलितेतिउन्मी
१८ लितमालतीवासुरभयइत्यर्थःकदंबोपिधूलीकदंबोवासंतिकएवातश्चैत्रकदंबपाइत्यनेनन
नविरोधःभाद्रकदंबपाइतितुनपाठःवार्षिकसुरतरस्यनदीकच्छेवर्णनानौचित्यात् प्रौढाउ
द्दीपनसमर्थाः॥तत्रैवावोधसीत्यन्वयःएतावतारेवावोधसोप्युपभुक्तसुरताधारत्वं॥
अत्रस्फुटोनकश्चिदितियःस्फुटोऽसौनालंकारःयश्चालंकारःसनस्फुटइत्यर्थः॥नचास्मि
ीत्यस्यबहुषुवरादिष्वन्वयात् क्रियादीपकंअस्मीत्यस्याहमित्यर्थेनिपातनात् अत्रास्मि १८
करोमीत्यादिवत्क्रियात्वेपिनदीपकंतदन्वयिनांप्राकरणिकत्वात्॥दीपकस्यप्राक
रणिकाप्राकरणिकोभयविषयकत्वावरादीनांगुणक्रियायोगपद्याभावान्नसमुच्च
यःनापितुल्ययोगितासादृश्याप्रतीतेरतएवनस्मरणंसएवहिवरइतिप्रत्यभिज्ञाकारः राजटी॰

नचवर्णानुप्रासः तस्योत्कंठाव्यंग्यविप्रलंभात्मकशृंगाररसानुपकारकत्वात् अत्यनुप्रास
स्यैव तदुपकारकत्वमित्यग्रे दर्शयिष्यमाणत्वात् अत एव न जातादयोपि अन्ये चाप्रसक्ता
एव विभावनाविशेषोक्तिरेतदुभयसंकरः काव्यलिंगं चेति चत्वारो विद्यमाना अप्यस्फु
टाः तथाहि विभावना तत्कारणप्रतिषेधेपि कार्यप्रदर्शनरूपा इयं चात्रास्फुटा उत्कं
ठाकारणप्रतिषेधस्य तत्कारणाभावत्वेनानभिधानात् किंतु तद्व्याप्यत्वेन एवं विशेषो
क्तिरपि कारणाभिधानेपि कार्याप्रदर्शनरूपा प्रकृते चानुत्कंठाकारणाभिधानेपि ना
नुत्कंठामभिधानं किंतूत्कंठाकारणत्वेन कार्याभावव्याप्यप्रदर्शनमिदमेवास्फुटत्व
मस्फुटयोः संकरश्चास्फुट एव उन्मीलितमालतीसुरभित्वस्य कदंबानिलप्रौढिहेतोरभि
धानेपि हेतुत्वेनानभिधानात् काव्यलिंगस्यास्फुटत्वमिति संक्षेपः ॥ ननु विभावापि परम
षि निष्पाद्यः शृंगारोत्र रस इति रसवदलंकार एव स्यादत आह रसस्यत्विति रसादीना
मप्राधान्ये सत्यलंकारता प्रकृते तु प्राधान्यादलंकार्यतेत्यर्थः ॥ सामान्यलक्षणे ज्ञाते वि

पंडित शेषजिज्ञासायामग्रिमग्रंथमवतारयति तन्निदानितिविशेषलक्षणानीत्यर्थः अत्र च विशेष
लक्षणेन तत्त्वकाव्यं त्रिधा उत्तममध्यमाधमभेदादिति विभाग आद्येऽप्य इति लक्षणेन यद्वा।
विभागस्य लक्ष्यतावच्छेदकावच्छिन्नलक्ष्यार्थोपस्थापनद्वारोपयोगे तस्य च लक्षणं तद्भूतो।
११ त्तमादिपदैरेव जातत्वान्नावश्यकत्वमपीत्याहुः॥ इदमुत्तममिति अतिशयोऽस्यास्तीत्यतिशा
यी प्रकृष्ट इत्यर्थः॥ तथा च वाच्यनिरूपितप्रकर्षाश्रयव्यंग्यकत्वमुत्तमत्वमित्यर्थः॥ ध्वना।
वतिव्याप्तिमाशंक्याह ध्वनिर्बुधैः कथित इति तथा चोत्तमकाव्यध्वनिपदयोः घटकलशा।
दिवत्पर्यायत्वमिति भावः॥ ध्वनिरेवं तावत्तैर लक्षणेनिष्पन्नो शेषभागस्यैव वैयर्थ्यमाशं।
क्य ध्वनिसंज्ञायाः स्वकपोलकल्पितत्वशंकानिराकरणार्थं तयाव्याचष्टे बुधैरिति प्रथ ११
नभूतेति तदभिव्यक्तिमंतरेणार्थप्रत्ययाभावात्प्राधान्यं स्फोटस्य तथा हि गामभ्याजदंडे
नेत्यादौ गोकर्मकाभ्याजनक्रियाकदंडकरणको वाक्यार्थबोध उत्पद्यते तत्र पदज्ञानं
पदार्थस्मृतिः ततो वाक्यार्थज्ञानमिति क्रमः॥ इदं चानुपपन्नं एकैकवर्णज्ञानस्य पदार्थ राजटी०

स्मृतावजनकत्वात् वर्णान्तरोच्चारणे वैयर्थ्यापातात् तावद्वर्णानामाशुविनाशित्वेन मेलका
नुपपत्यात्तावद्वर्णघटितपदज्ञानासंभवात् न च प्रत्येकवर्णानुभवजनितसंस्कारेण ताव
द्वर्णगोचरस्मृतिसंभवादुपपत्तिः अन्यगोचरसंस्कारस्यान्यगोचरस्मृतावतिप्रसंगेनाज
नकत्वात् जनकत्वे वा आनुपूर्वीविपर्यासेप्यर्थस्मृतिप्रसंगादिति वर्णव्यंग्यः पदार्थस्मृ
त्यनुकूलः पदे वाक्ये च स्फोटः न चात्रापि वर्णव्यंग्यत्वेपि मिलितविकल्पावकाशः सा
मान्यतः आदिवर्णविशिष्टस्य चरमवर्णस्य व्यंजकत्वस्वीकारात् तदुक्तं एकैकवर्णसामर्थ्या
न्मेलकानुपपत्तितः ।। एकबुद्धेर्नदीदीनतोन्यः स्फोटः स च द्विधेति न च वर्णानान्नित्यत्वात्प्र
तीकारः तेषां सत्तामात्रेणानर्थात्वेति प्रसंगात् तदभिव्यक्तिर्वा व्यासा चाशुविनाशिनी क्रमवती
चेति तद्दोषतादवस्थ्यादिति स्फोटवादिनो वैयाकरणाः ।। एवमेतैः प्रधानीभूतव्यंग्यव्यंजा
कस्य ध्वनिरिसंज्ञा कृता अतस्तन्मतमनुसरद्भिरालंकारिकैर्न्यग्भावितमुपसर्जनीकृतं वा
च्यं येन तादृशं व्यंग्यं विरव्यादितद्व्यंजकस्य शब्दार्थयुगलस्य ध्वनिरिति संज्ञा कृतेत्यर्थः

पंडित अत्रवाच्यपदेनलक्ष्यस्याप्युपलक्षणं तथा च प्रधानीभूतव्यंग्यव्यंजकत्वरूपया भक्त्या काव्ये भ
क्तो ध्वनिपदप्रयोग इत्यर्थः॥ निःशेषेति न तु किंचित्संभोगजनितश्रमातिरेकात्स्वेदाधिक्या
मिति भावः॥ च्युतं न तु ह्रासितं निर्मृष्टो न तु धौतः कुरंगजने न तु धौतांजने इत्याद्यर्थोपस्थाप
१२ कानां च्युतादिपदानामपि प्रकृतार्थव्यंजकत्वं प्राधान्येनाधमपदस्य तदर्थपर्यालोचन
12 मंतरेण च्युतादिपदानामपि संमुखार्थैरपि पर्यवसानसंभवादित्यभिप्रायेणाह प्राधान्येन
ाधमपदेनेति तात्पर्यानुपपत्तिलक्षणा वीजमपकृष्टवाचिनो धमपदस्य दूतीरमणकर्तृ
त्वविशेषो लक्ष्यो दूत्यास्तदंतिकगमनं व्यंग्यमित्यर्थः॥ केचित्तु न अपदस्य विरोधिलक्षणया
तदंतिकमेव गतासीत्यर्थः॥ रंतुमिति तु व्यंग्यं गतासीत्यनंतरं लक्ष्यत इति शेषः॥ व्यज्य १२
त इत्यर्थस्य रंतुमित्यनेन संबंध इत्याहुः॥ इदं तु न सम्यक्॥ अधमपदेन व्यज्यत इति वृत्ति
विरोधात्। मिश्रास्तु अधमपदेनेति प्रयोजकत्वे तृतीया तदर्थस्य दूतीरमणकर्तृत्वस्य च्यु
तादिपदतात्पर्यार्थसहकारेण व्यंजकत्वात्॥ न तु पदस्य तस्य हि व्यंजकत्वं लक्षणामूल राजटी॰

ष

मभिधामूलत्वं वानाद्यो मुख्यार्थबाधाभावात् नापरो नानार्थत्वाभावात्पदस्येत्याहुः ॥ प्रांच
स्तु ध्वनिकृता निषेधविध्योरुदाहरणद्वयं दत्तमिति गौरवादेकमेवोभयोरुदाहरणमाह नि
:शेषेति तथा च वापीं स्नातुमित्यादि विधिनिषेधवाचकपदयोर्निषेधविधी व्यंग्याविः
त्याहुः ॥ मध्यमकाव्यं लक्षयति अताद्रूगिति व्यंग्यप्रतीयमान इति शेषः ॥ तेन नाधमका
व्यातिप्रसंगः तथा च काव्यनिरूपितप्रकर्षानाश्रयप्रतीयमानव्यंग्यकत्वमिति लक्षण
र्थः ॥ गुणीभूतव्यंग्ये अतिव्याप्तिमाशंक्याह गुणीभूतव्यंग्यमिति तथा च पर्यायत्वान्नाति
व्याप्तिः तद्भेदाश्च मध्यमकाव्यभेदा एवेति भावः ॥ एकदेशमुदाहरति ग्रामतरुणमिति ग्रा
मस्थत्वेन नित्यसंन्निधानादवंचनीयता तरुणत्वेनोपभोगसामर्थ्यमिति स्वश्रूयोजनं तरु
णा इत्याकांक्षावेदग्ध्यं नवेत्यायुद्दीपनविभावः ॥ मुहुः पश्यन्त्या नितराम्म्लिना इत्यव्या
याभ्यामविच्छेदः स्वापराधश्च व्यज्यते वाच्यस्य मुखच्छायामालिन्यातिरेकस्य चमत्कारित्वा
दिति ॥ अनुभावित्वेन साक्षादेव विप्रलंभोपस्थापकत्वादित्यर्थः व्यंग्ये तु स्वीकृता परिपा

पंडित स्तनेनापकर्षितत्प्रतीतेरचमत्कारित्वादितिभावः॥ अथधर्मंलक्षयति॥ शब्दचित्रमितिइदंच।
स्वरूपकथनमात्रंनतुविभागस्तस्याग्रेप्रदर्शयिष्यमाणत्वादितिमिश्राः॥ वस्तुतोननुकीदृ।
शोऽयंविभागःशब्दचित्रस्याप्यर्थवैचित्र्येणपरस्परासांकर्याभावादित्याशंकायामग्रिम
१३ ग्रंथावतारार्थंदितिविभागएवायमिति॥ यथाकथंचिद्व्यंग्यसद्भावेनासंभवमाशंक्या
13 हस्फुटप्रतीयमानाव्यंग्यार्थरहितमितिस्वच्छंदेतिमंदाकिनीगंगामंदतांसिंचयादिति।
योजनादातंकृशांतदितरत्प्रचुरंमूर्च्छामोहाद्दूरीभवदज्ञानायेमहर्षयःतैर्हर्षेणावि
हितंस्नानमाह्निकंचयस्यांसादृष्टारागिरिम्मिह्नुकोवादीधौअदरिद्रावहत्वश्चद्रुमाःअत्रानुप्र
सिस्यातिनिर्वाहान्मंदाकिनीविषयकरतेःस्फुटानप्रतीतिरिति॥ वाच्यचित्रमुदाहरति। १३
विनिर्गतमितिमानदंमानस्यखंडकंदातारंवाशक्रमित्रयोःयंहयग्रीवंअत्रात्रद्रष्टारं
कारःतत्रचकवेस्तात्पर्याद्राजविषयकरतेस्तथानप्रतीतिरितिइदमेवचाधमत्वंन
तुसर्वथाव्यंग्याभावःतथासतिकाव्यत्वमेवनस्यादतएवात्रव्यंग्यसत्त्वादिदंनप्रकृतो राजटी०

दाहरणमिति दूषणमनवकाशं वेदितव्यमिति ॥ ॥ःःः॥ ॥इति श्रीपंडितराजविरचिता
यां काव्यप्रकाशटीकायां प्रथमोल्लासः ॥ ॥ःः॥ ॥तददोषावित्यादि काव्यलक्षणे
शब्दार्थयोर्विशेष्यत्वेन प्राधान्यात्प्रथमं जिज्ञास्यत्वेनादौ तयोरेव निरूपणं क्रियत इत्या
तऽप्राह क्रमेणेति लक्षणैकक्रमेणेत्यर्थः ॥ तथा च शब्दस्य प्राधान्यात्प्राधान्यमिति प्रक
तिपितथैवेति भावः ॥ लक्षणे ह्युपयोगात्प्रथमं विभागमाह स्याद्वाचक इति यद्यपि वि
भागादेव त्रित्वं लब्धं तथापि गौणी लक्षणया भिन्नेति न्यूनता व्यंजनायां च प्रमाणमेव ।
नास्तीत्याधिक्यं च विभागस्येति परविप्रतिपत्तिनिरासार्थमाह त्रिधेति तथा च यथा गौणी
लक्षणाप्रभेद एव व्यंजना च भिन्ना वृत्तिस्तथाग्रे वक्ष्यत इति भावः इत्यभिप्रायेणैवोक्तं
ऽत्रेति तथा च छेऽत्रेतीति काव्य इति तथा च यथा शास्त्र एकस्यैव शब्दस्य वृत्तिद्वै
विध्याद्वैविध्यं तथा काव्ये वृत्तित्रैविध्यान्त्रैविध्यमिति विभागे नाधिक्यमिति नान्यथ्यं
॥ विभागानंतरं लक्षणस्य जिज्ञासाविषयत्वेनाभिधानात्तदनभिधानं समर्थयति एषा

पंडित मिति स्वरूपं लक्षणं ॥ अर्थस्यापि व्यंजनाश्रयत्वमिति प्रथमतस्तत्रैव जिज्ञासेति तान्विभजते
वाच्यादय इति ॥ मिश्रास्तु शब्दानामपि लक्षणमर्थघटितमेवेति तेषां लक्षणमकृत्वाप्य
र्थविभाग इत्याहुः ॥ ननु वाच्य आदिर्येषां ते वाच्यादयः एवं च वाच्यस्याप्रवेशो बहुवच
१५ नानुपपत्तिश्चेत्यत आह वाच्यलक्ष्यव्यंग्या इति तथा च तद्गुणसंविज्ञानबहुव्रीहिणा त्रया
णामुपादानमिति भावः ॥ ननु तथापि विभागो न्यूनस्तात्पर्यार्थस्य तुरीयस्य विद्यमान
त्वादित्यत आह तात्पर्यार्थोपीति तथा च एतस्यासर्वसम्मतत्वान्न तु लक्षकहृतयोपादा
नं व्यंजकस्य तु सुयुज्यवष्टंभादिति भावः ॥ कोसावित्यत आह आकांक्षेति अभिधानाप
र्यवसानमाकांक्षा अव्यवधानेनान्वयप्रतियोग्युपस्थितिः सन्निधिः बाधकमानाभा १५
वो योग्यता तथा च एतत्त्रितयसहकृतात्तात्पर्यादेव वाक्यार्थबोधोपपत्तौ तत्र पदशक्ति
र्न कल्प्यते प्रकारांतरालभ्ये शक्तिकल्पनादिति भावः ॥ वक्ष्यमाणस्वरूपाणां जात्यादीन
ां तात्पर्यार्थो वाक्यार्थ इत्यन्वयः ॥ अपदार्थेपि युक्तिमाह विशेषवपुरिति अयमाशयः राजटी०

अन्विते शक्तिमंगीकुर्वतापीतरान्वितरसाग्रशक्तिरंगीकार्यानन्वान्वयनाद्यन्विते श-
क्त्यानंत्यप्रसंगात् तथा च विशेषोपस्थितिराकांक्षादिसहकृतात्पदादेवेति वाच्यं एवं
च किमन्वये शक्तिकल्पनया प्रकृतसहकारिविशिष्टात्पदादेव तदुपस्थितेरिति अ-
भिहितान्वयवादिनामिति बहुवचनमेतन्मतस्य प्रमाणसिद्धत्वसूचनाय वाच्य एवे-
तिम्र शाक्यस्य पदादुपस्थितावति प्रसंगादिति परे एतत्र शक्ति स्वीकारादतो न सकल
मतसिद्धमेतस्य पदार्थत्वमिति भावः ॥ अन्विताभिधानवादिन इति मतमित्यनुवर्तते एकव-
चनं च तन्मतस्य युक्त्या सहत्वप्रतिपादनाय तत्रान्यत्रानुसंधेयाः इति यद्यप्युद्देशक्रमानु-
वोधाद्दादौ शब्दव्यंजकत्वमुदाहर्तुमुचितं तथापि शब्दस्य व्यंजकत्वं स्फोटादौ प्रसिद्धमप्य-
र्थस्य तु न क्वापीति प्रथमतो जिज्ञासाविषयत्वद्योतनाय अप्रसंकीर्णस्थलाभिप्रायात् शब्द-
स्य व्यंजकत्वमनुक्त्वाप्यर्थव्यंजकत्वमाह सर्वेषामिति प्रायः पदोपादानं न सर्वार्थव्यक्ते-
र्व्यंजकत्वं किंतु वक्तृबोद्धव्यादिसहकारिविशेषाविशिष्टार्थव्यक्तेरिति प्रतिपादनार्थं ॥

पंडित अपितुभिन्नक्रमोऽर्थानामपीत्यर्थः॥तथाचाव्यंजकत्वप्रदर्शनेनशब्दव्यंजकत्वनुप्रा
तिक्षिप्यतइत्यर्थः व्यंजनायास्त्वयथार्थैरन्तित्वंतथाग्रेवक्ष्यतेमाएघरोवअरणमितिमात
र्गृहोपकरणंअद्यखल्वनास्तीतिप्रसाधितंत्वयातद्भणकिंकरणीयंएवमेवनवासरः
२५ स्थास्यतीति॥अत्रमातरितिचाटूक्तिःगृहोपकरणमित्यावश्यकतान्वयेतिस्वापराध
15 ाभावःउततरुणेतिस्वाप्रेक्षाविरहःएवमेवेत्यादिनाअतीतेदिनेतराज्ञयापिनयास्या
मीतिप्रत्यायनमात्रंव्यज्यतेइयंचसंगमसमयजिज्ञासयासन्निहितमुपनायकंप्रति
कस्याश्चिदुक्तिःअत्रेतिप्रतिपादितानामर्थानामर्थसंधानाद्वक्तृविशेषसव्यपेक्षा
त्प्रकृतोऽर्थःप्रतीयतइवावाच्यार्थस्यव्यंजकत्वमित्यर्थइतिप्रांचः॥स्वैरविहारार्थिनी २५
यमितिवक्तृविशेषाभिधानंव्यंग्यस्तुदिनेगतेसंगमोभविष्यतीतिमिश्राः॥नचात्रवाक्यार्थ
स्यव्यंजकत्वंनतुवाच्यस्येतिवाच्यंवाक्यार्थोपिशक्यात्तस्यापिवाच्यत्वात्वाक्यार्थेपदार्थ
प्रवेशावश्यकत्वाच्चेतिभावः॥साहंनीतिसाधयंतीसखिसुभगंक्षणेक्षणेदूनासिमत्कृ राजटी०

ते॥ सद्भावस्नेहकरणी यस्य दृश्यंते तावद्विचिंतं त्वया॥ साधयंती प्रसाधयंती अत्रेति दूत्याः प्रमाणांतरेणापकारित्वनिश्चये मुख्यार्थबाधावतारे विपरीतलक्षणेन तत्र विरोधित्वं संबंधः कामुकोऽधम इति व्यंग्यमिति उ अनिश्चलेति पश्य निश्चलनिस्पंदा विसिणीपत्रे शोभते बलाका निर्मलमरकतभाजनपरिस्थिता शंखशुक्तिरिवेति अत्र निश्चलत्वं शारीरस्पंदविरहः निस्पंदत्वं गमनराहित्यं निश्चलेति संबोधनं वा अतीतनपोनस त्यं शंखशुक्तिमुत्कास्फोटः यद्वा शंखाकारा शुक्तिर्मुक्ताकारा शुक्तिरेव अतः संकेतस्थानमित्यनेन संभोगो व्यंग्यतयादर्शितः॥ अथवेत्यनेन विप्रलंभ इति॥ मिथ्यास्तु हे निश्चल तदनुसंधानरहित स्थायमेवागत्य पश्य बकाना की विसिणीपत्रे राजते न तु स्थास्यतीति अत्र हेतुर्निस्पंदा संभ्रान्त्येव निस्पंदा अग्रे न स्थास्यतीत्येवेति भावः॥ निर्मलमकरे तेत्यादिना विसिणीपत्रस्य तत्स्पर्शातिकाठिन्यं शारीरस्य विरहातिरेकात्तापाधिक्यं त्वमित्युपमाव्यंग्येनानुभावेन विप्रलंभा डु
तिशयो व्यंग्य इत्याहुः॥ क्रमेणेउद्देशक्रमेण उक्तयुक्त्या अर्थजिज्ञासा याः प्रार्थस्येन प्र

पंडित तिबंधकतयार्थनिरूपणेन तदुपगमादवसर लक्षणार्थं त्र संगतिरिति मिश्राः॥ वाचकादी
नामिति पूर्ववदजहत्स्वार्थास्वरूपमिति लक्षणं साक्षादिति अत्राभिधत्ते प्रतिपादयतीत्य
र्थान्तत्वाभिधया प्रतिपादयतीति वाचकशब्दव्यापारस्याभिधान्वेनान्योन्याश्रयात् योर्थं
२६ प्रतिपादयति स वाचक इति कृते लाक्षणिकेऽतिव्याप्तिरत उक्तं संकेतितमिति अस्मा
16 च्छब्दादयमर्थो बोद्धव्य एवंरूपात्वाभिप्रायस्य संकेतस्य तत्राभावात् एतावन्मात्रं चाभिधा
मूलकव्यंजकशब्देतिव्याप्तिमतः साक्षादिति प्रतीतिविशेषणं प्रतीनंतरमद्वारीकृते
त्यर्थः तत्र हि प्रथमं प्राकवाचकस्यान्वयबोधोऽनंतरं व्यंग्यस्येति क्रमः न च साक्षात्प्र
तिपादयतीत्येवमस्तु गामुच्चारयेत्यादौ शब्दपरलाक्षणिकेऽतिव्याप्तेः तत्र साक्षादेवा २६
लक्षणया गोशब्देन गोशब्दस्योपस्थितेरिति ननु जहत्स्वार्थलाक्षणिकेतिव्याप्तिमिदं त
त्र हि साक्षादेव संकेतविषयार्थोपस्थितेरिति चेत् न संकेतविषयतावच्छेदकेन रूपेण
संकेतविषयार्थोपस्थितेर्विवक्षितत्वात् अजहत्स्वार्थायां तु शाक्यलक्ष्यसाधारणरूपे राजटी०

णोपस्थितेः न च संकेतविषयत्वमर्थविशेषणमधिकं ग्रंथकारमते गंगायां घोष इत्यादौ
संकेतविषयतावच्छेदकगंगात्वादिनैव तीराद्युपस्थितेः तथा च वक्ष्यति तटादीनां गंगा-
त्वप्रतिपत्तिरित्यादि तथा च तत्रातिव्याप्तिवारकत्वात् तन्मतेपि तत्र संकेताभावात् शक्यसं
वंधादेव लक्ष्यस्मृतौ संकेतकल्पने मानाभावात् अनन्यलभ्यस्य शब्दार्थत्वादिति न च साक्षा
दिति व्यर्थं अभिधामूलव्यंजनायां शक्यतावच्छेदकप्रकारेणैव व्यंग्यार्थोपस्थितेस्तत्राति
प्रसंगवारकत्वादिति तदयं पर्यवसितोर्थः यः शब्दः संकेतविषयतावच्छेदकरूपेण संके
तविषयीभूतं यमर्थं प्रतीत्यंतरमद्वारीकृत्य यदोपस्थापयति स शब्दस्तदा तस्य वाचक इ-
ति अभिधामूलव्यंजनायां व्यंजकस्यापि वाचकत्वात् प्रतीत्यंतरमित्यादे वैयर्थ्याशंकया
यदा तदेति तथा च यदृशायां तत्पदस्य न वाचकत्वमिति तद्वारणाय विशेषणमर्थवदेवेति प्रं
चस्तु साक्षात्प्रतिपादयति संकेतितं प्रतिपादयतीति लक्षणद्वयं इदं च यथाश्रुतं अजहत्स्व
ार्थलक्षणाके अभिधामूलव्यंजके चातिव्याप्तं विवक्षया यास्तु पूर्व एव लक्षणार्थः ॥ अपरे तु

पंडित

साक्षादिति संकेतविशेषणं तथा च साक्षात्संकेतविषयार्थप्रतिपादकत्वं लक्षणं संकेत
श्चाप्नाभिप्रायः लक्षणायां तु शक्यं बोधयित्वा लक्ष्यं बोधयित्वा लक्ष्यं बोधयित्विति परस्प
रयाभिप्रायः व्यंजनायां त्वभिप्रायनियमो नास्ति तत्राप्यस्ति तत्रापि परस्परयैवेत्याहुः॥ अत्राभि
१७ प्राः यत्राजहत्स्वार्थलक्षणा एकशक्यलक्ष्ययोर्युगपदुपस्थिता वा प्राभिप्रायस्तत्रातिव्याप्ते
17 रिति दूषणमाहुः॥ वस्तुतस्तु अभिधामूलव्यंजनायां यत्र शक्योपस्थितिरेव व्यंजनया तत्राति
व्याप्तेरपहरणीयत्वादिति संक्षेपः॥ साक्षात्संकेतितमित्यत्र संकेतज्ञानस्यार्थप्रत्यायकत्वं ल
भ्यते अत्र किं प्रमाणमत आह इहागृहीतेति तथा चान्वयव्यतिरेकाभ्यामेव संकेतज्ञान
स्यास्य प्रतीतिजनकत्वमिति भावः॥ अर्थविशेषः पदार्थसंकेतस्य संबंधिकत्वेन तज्ज्ञान १७
ाय संबंधिनं विरेचयति संकेतितः इति जात्यादिरित्यादिपदेन गुणक्रियायदृच्छाशब्दा॥
गृह्यंते नन्वानयनादिव्यवहारविषयतया व्यक्तेरेव प्राप्तिः सूचितेत्याशंकते यद्यपीति
निराकरोति तथापीति आनंत्यादिति अनंतानां कोव्यक्तीनामनुपस्थितेस्तत्र संकेतो॥ राजटी०

ग्रहीतुन्न शक्यत इत्यर्थः ॥ एतन्मते सामान्यलक्षणं नास्तीति भावः ॥ व्यभिचारादिति ॥
व्यक्तीनामनंत्यात्संकेतग्रहाविषयीभूता अपि व्यक्तयः पदाज्ज्ञायंत इत्यभ्युपगमे कारणं विना ॥
कार्योत्पत्तौ व्यभिचार इत्यर्थः ॥ यद्वा व्यभिचारात् व्यभिचारप्रसंगात् संकेतग्रहाविषयत्वा
विशेषेऽर्थादेरपि भानप्रसंगादित्यर्थः ॥ ननु नैयायिकानां सामान्यलक्षणया सर्वव्यक्त्यु
पस्थितिर्मीमांसकानां यद्धर्मवत्तयोपस्थिते शक्तिग्रहस्तद्धर्मा अन्वयस्य स्मरणगोचरस्या
पि अन्वयबोधविषयत्वं स्यादेवसमानप्रकारकत्वस्यैव नियामकत्वादतो व्यक्तिशक्ते
र्दोषांतरमाह गौः शुक्ल इत्यादि गोशुक्लादिपदानां व्यक्तिवाचकत्वे पर्यायत्वापत्तौ सह ॥
प्रयोगो न स्यादित्यर्थः ॥ यद्वा विषयविभागः प्रकारभेदस्तथा च गोपदादिजन्यप्रतीतीनां ॥
प्रकारभेदो न स्यादित्यर्थः ॥ ननु सांकेतितश्चतुर्भेद इत्युपक्रमे तन्नदूपधारेवेत्युपसंहारो
विरुद्ध इत्यपरितोषादुपाधिसंकेतावेदचतुर्विधत्वं व्यवस्थापयति उपाधिश्चेति वस्तु ॥
धर्म इति वस्तूनाद्धर्मः साधर्म्यमिति यावत् वक्तृयदृच्छासन्निवेशितः संज्ञाशब्दात्मको ॥

पंडित वा अप्रतीतेः न सांकर्यं ।। यद्वा वस्तुधर्म इति साक्षात्संबंधाभिप्रायेण । इत्यादीनां तु स्वाश्रयसं
योगात्मकेन परस्परासंबंधेन वस्तुधर्मत्वमिति भेदः ।। सिद्ध इत्यनेन क्रियातो भेदः तस्याः
साध्यत्वेनैव प्रतीतेः तदाहुः यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते ।। आश्रितक्रमरूप
१९ त्वात्सा क्रियेत्यभिधीयते इति ।। आश्रितेति तथा च एकैव सिद्धासिद्धतावद्व्यापारव्यंग्य
19 ा क्रिया अप्रतीतेनानन्त्यादिदोषावकाशो व्यापारक्रमाच्च क्रमिकत्वप्रतीतिरिति भावः ।। सि
द्धत्वमनुत्पाद्यत्वं साध्यत्वमुत्पाद्यत्वमिति ।। पदार्थस्य प्राणप्रद इति प्राणप्रद इव प्राण
प्रदः पदार्थव्यपदेशहेतुरित्यर्थः ।। केचित्तु यावदाश्रयस्थितिस्थायित्वं इदं च जातावेव
गुणानामाश्रयस्थितावपि संबंधनाशेनाश्रयपरीहारोपगमात् तन्मते समवायस्यापि ना १९
शादित्याहुः ।। विशेषाधानहेतुश्चेति गोत्वादिना अविशिष्टपदार्थानां मुख्यादिना विशे शुक्ला
षाधानादित्यर्थः ।। आद्यः पदार्थस्य प्राणप्रदः गोत्वाभिसंबंधादिति तथा च गवादि
व्यपदेशहेतुत्वं प्राणप्रदत्वमित्यर्थः ।। द्वितीय इति विशेषाभिधानहेतुरित्यर्थः एतदे राजटी०

वोपपादयति शुक्लादिनाहीति लब्धसत्ताकमिति गवादिव्यपदेशाविषयीभूतमित्यर्थः
॥यद्वा लब्धसत्ताकं सत्तावच्छिन्नं तथा च जात्यवच्छिन्नं शुक्लादिना गुणेन व्यावर्त्यते न तु गु
णावच्छिन्नं जात्येति भवति विशेषाभिधानहेतुत्वं गुणेनामिति भावः॥पूर्वापरीभूतेति
अधिश्रयणाद्यवतारणपर्यन्तः पूर्वापरीभूतः क्रियाकलापः स एव व्यर्थः न ह्यधिश्र
यणं पूर्वावयवो नवावतारणमुत्तरावयवः किं तु सर्व एव क्रियाकलाप इति प्रत्ययोपा
दानं॥वस्तुतस्तावद्व्यापारवंग्या एकैव क्रियापदार्थास्तेनानंत्यादिदोषापीत्युक्तमेवे
ति यदृच्छासन्निवेशित इति यदुक्तं तद्याचष्टे डित्यादीनामिति अत्र डित्यादिसंज्ञाश
ब्दानां स्फोटः प्रवृत्तिनिमित्तं स एव च प्रतीतो प्रकारस्तस्य च शब्दाभिसंज्ञा शब्दाभिन्नत्वं
शब्दस्य च द्रव्यत्वमिति वैयाकरणाः स च यद्यपि जात्यादिशाब्दज्ञानेपि भासत इति मा
साधारण्यं तथापि तत्र जात्यादेरेव प्रकारकत्वमत्र तु स्फोटस्येति विशेषः॥अन्तिमव
र्णज्ञानेन निःशेषतो ग्राह्यमाद्यैरीषमग्राह्यमित्यभिप्रायः संहृतक्रममेकत्वादित्यर्थः॥

पंडित यद्वा संहृतक्रमसमर्थप्रत्यायनेन यथा स्फोटाभिव्यक्तौ वर्णानां क्रमस्तथा स्फोटस्यार्थप्रत्याय न
नइत्यर्थः ॥ जातिशक्त गवादिपदेषु प्रथमं जातिप्रतीतिरथ व्यक्तिप्रतीतिरिति क्रमोऽस्ति।
डित्थादिषु नैवमित्यर्थाः इत्यप्याहुः ॥ उपसंहरति इति गौरिति चतुष्टयीति चतुर्विधानां।
१९ शब्दानां चतुष्टयं शक्यमित्यर्थः ॥ ननु प्राणप्रदत्वस्य परमाणुत्वादावपि गतत्वात्कथमा।
19 यं गुणशब्द इत्यत आह परमाण्वादीनामिति परमाणुत्वादीनामित्यर्थः पारिभाषिकं
वैशेषिकादिव्यवस्थासिद्धं वस्तुतः प्राणप्रदत्वाविशेषाज्जातिशक्तत्वमेवेति भावः ॥ न
नु गुणादीनामपि नानार्थव्यक्तिशक्तिपक्षोक्तानि भूषणानि स्फुरन्त आह गुणेति एकैका
एव नीलादिव्यक्तयः उत्पादविनाशधीस्तु समवायविषयिणी क्रियास्फोटयोरेकत्वमु १९
पपादितमेवेति भावः ॥ एवं च सति भेदान्वयं समर्थयति आश्रयभेदादिति द्रव्यव्यापा।
रवणीयपाश्रयभेदादित्यर्थः तथा चान्यथासिद्धा बुद्धिभेदेन प्रमाणमित्यर्थः ॥ जाति
रेवेति पक्षमुपपादयति हिमः पय इत्यादिना यादृशेनेति अनुगतकार्यस्यानुगतका राजटी०

रणनियम्यत्वाद्धात्रीनामननुगमाज्जातिरेवानुगतकारणमित्यर्थः एवमेवेति अननुगतबो
धानुबोधादेव पाकत्वादिकमपि सामान्यमित्यर्थः वास्तवदृष्ट्येति शाब्दवैलक्षण्यस्य स्फुटा।
त्वात्तत्रानुगतबुद्ध्यनुबोधाज्जातिस्वीकारे सैव शक्येत्यर्थः ।। प्रतिलक्षणमिति तत्तल्लक्षणवै
शिष्ट्यान्यत्वमङ्गीकृत्य ।। वस्तुतः प्रतिलक्षणमिति वदता एकस्यापि डित्थादेराहारपरि
णामादिना भेदोऽभिमतस्तेन डित्थादेरननुगमानुरोधात्सामान्यं सिध्यतीति भावः ।। तद्वा
स्तजातिमान् अपोहः अतद्व्यावृत्तिः अन्यैर्नैयायिकैः वैनाशिकैः उपयुक्तं गुर्वपि वि।
रिच्यत इत्यत आह प्रकृतानुपयोगादिति प्रकृते व्यंजने ।। अथ परिशेषाद्व्यंजनाम।
तिरिक्तां सिसाधयिषुरभिधां लक्षयति समुख्यार्थ इति यद्वा मुख्यार्थबाध इति लक्षण
ालक्षणप्रवेशात्तमाह स इति वाचक इत्यस्य भ्रमं धारयति साक्षादिति मुख्यार्थपरा
मर्शभ्रमं निराकरोति अस्येति मुख्यार्थस्य संकेतविषयतावच्छेदकप्रकारकस्मृति।
प्रयोजकज्ञानविषयत्वं वृत्यन्तरानुपजीवकत्वमिति केचित्तन्न वर्णादिनिर्व्यंज। ७७

पंडित नार्यास्यापरलक्षणयोश्चातिव्याप्तिः तदयं लक्षणार्थः साक्षात्संकेतितार्थोपस्थित्यनुकूलः
संकेतविषयतावच्छेदकप्रकारस्मृतिप्रयोजकज्ञानविषयपदार्थसंबंधोभिधा ऽभिधेय
विशेषणेनाभिधामूलव्यंजनायामतिव्याप्तिवारणमिति साक्षादिति मूपक्रमानुसारेण
२० ॥वाचकनिरूपणानंतरं लाक्षणिकः शब्दो निरूपणीयः तन्निरूपणं च लक्षणानिरूपणा
धीनमिति लक्षणं निरूपयति मुख्यार्थबाध इति लक्ष्यते प्रतिपाद्यते यदित्यस्य व्ययं यदन्य
र्थः॥ तत्पदेनोपसर्जनीभूताया अपि प्रतीतेः परामर्शस्तात्पर्यविषयादन्यः शक्यभिन्नः।
मुख्यार्थः पदार्थः तेन वाक्यार्थस्यापि संग्रहे कुशलादिपदे वाक्यार्थबाधमूललक्षणायां
नाव्याप्तिः न च वाक्यार्थः कथं पदार्थः सुप्तिङंतं पदमित्यर्थशासनात् एतन्मतेपि वाक्ये २०
शक्तिस्वीकारात्तथा च मुख्यार्थबाधतद्योगयोः शक्यभिन्नार्थोपस्थितिर्लक्षणा अभि
ध्यविशेषणेन व्यंजनायां ध्वनितायेन धूमोस्तीत्यादिवाक्यजनितवह्निप्रतीतावनुमिति।
रूपायामतिव्याप्तिवारणं रूढित इत्यादिविभागः एतन्मते प्रतीतिरेव लक्षणा तदुक्तम राजटी०

च्यत

भिधेयाविनाभूतप्रतीतिर्लक्षणे इति वस्तुतस्तु यत यस्मात्सा प्रतीतिः स व्यापारो लक्ष
णा व्यापारश्च शक्यसंबंध एव तथा च मुख्यार्थबाधे सति शक्यभिन्नार्थोपस्थित्यनुकूल
: शक्यसंबंधो लक्षणा उपस्थितिश्च शाब्दीतेन धूमोस्तीत्यादौ नातिव्याप्तिः न च शक्यसं
बंधपदादेव तद्वारणे व्याप्तेरपि संबंधकत्वात् न चैवं तत्पदवैयर्थ्यं व्यापारमात्रे तात्पर्या
दिति ॥ केचित्तु मुख्यार्थ एव तीरमुपस्थापयति न च वृत्तित्वविरोधः व्यंजनावदुपपत्ते
रिति मन्यंते तन्मतनिरासायाह आरोपितेति शब्दस्यैवायं व्यापारः परस्परा शब्द एव तदु
पस्थापकः अपरथा तदर्थस्य विभज्यार्थान्वयो न स्यादिति भावः ॥ अर्थनिष्ठः संबंधः शा
ब्दे आरोप्यते इत्यारोपितत्वं ॥ वस्तुतः अशक्यसंबंधः परस्परा शब्द एवेति नारोपः ॥
रूढित इति तु विभागो न तु लक्षणे प्रविष्टमनुपयोगादव्याप्तेश्चेति लक्षणद्वयमुदाह
रणद्वारा विषदयति कर्मणीति मुख्यार्थबाधं स्फोरयति दर्भेति कुशस्य शब्दो हि योग
रूढिभ्यां कुशादानकर्तरि निपुणे व्यक्तिवचनान्यायेन परस्परावरुद्धोपस्थापकतया

पंडित मुख्यः नचरथ्यादिकर्मणि निपुणमात्रे विशिष्टमस्तीति मुख्यार्थबाधे विशिष्टशक्तस्यै
कदेशोपस्थितौ स्थूलपर्य्यायपंकजपदवत्प्रावल्लक्षणिक इत्यर्थः न विशेष्योपस्थितौ न लक्ष
णा अन्यथा गौर्द्दव्यमित्यत्रापि तदापत्तेरिति वाच्यं विशेष्यविशेषणभावे कामचारात् अ
२१ न्यथा पंकजपदेपि तदापत्तेरिति भावः ॥ अतो न लक्षणार्थोत्र बाधतो योगार्थः न मुख्य इति
कथमत्र मुख्यार्थबाध इति दूषणमनवकाशं वेदितव्यमिति ॥ प्रयोजनवतीमुदाहरति
गंगायामिति मुख्यार्थयोगं दर्शयति विवेचकत्वादाविति रूढित इत्यस्य व्याख्यानं प्र
सिद्धेः प्रयोगप्राचुर्य्यादित्यर्थः ॥ इदमवधेयं न केवलं विशिष्टशक्तस्यैकदेशपा
रतायामेवेति लक्षणा किं नामानादिलक्षणा सर्वैव धूमादिहेतुपदानां ज्ञानपरत्ववत २१
त्वगादिपदानामिंद्रियपरत्ववच्च न च शक्तिरेव न कथमिति वाच्यं अन्यलभ्यत्वादि
ति ॥ अत एव कुशलपदस्य निपुणे शक्तिरेवेति परास्तं शक्यसंबंधेनैवोपपत्तेः श
क्तिरकल्पनादिति ॥ तथा प्रतिपादनात्मन इति तीरनिष्ठतया प्रतिपादनरूपादित्य राजटी०

र्थः मुख्येन कुशलादिपदेन ॥ यद्वा शक्येनार्थेनोपयोगितया तृतीया लक्षणायामसमर्थ
स्याप्युपयोगादित्यर्थः ॥ अन्य इत्यस्य व्याख्या अमुख्य इति सांतरेति अंतरं व्यवधानं तेन
सह वर्त्तते सांतरोर्थस्तन्निष्ठः मुख्यार्थव्यवहिततीरादिनिष्ठ इत्यर्थः ॥ निरूढिलक्षणा
याः प्रकृतोपयोगाभावात् सप्रयोजनलक्षणामेव विभजते स्वसिद्धय इति स्वार्थान्वयबो
धार्थं पराक्षेपः परोपस्थापनं परार्थं परस्य घोषादेरन्वयबोधार्थं स्वसमर्पणं स्वार्थ
त्यागः ॥ लक्षणयोर्द्वयोर्द्वयमाह उपादानमिति तथा चोपादत्त इत्युपादानं लक्ष्यत इ
ति लक्षणमिति लक्षणाभ्यामन्वर्थसंज्ञयोरित्यर्थः ॥ इदमेवाजहत्स्वार्थाजहत्स्वार्था
भेदद्वयमुच्यत इति भावः ॥ आद्यामाह कुंता इति आत्मेति स्वातंत्र्येण प्रवेशस्य बाधादि
ति भावः ॥ प्रयोजनं च बाहुल्यप्रतीतिः कुंतानां कुंतिनो यांतीत्यत्र न तथा कुंतबाहुल्यं
प्रतीयते यथा कुंता इत्यनेनेति ॥ एकदेशिमतं दूषयितुं विषदयति गौरनुबंध्य इति ॥
सदोषपुरुषाप्रणीतं वाक्यं श्रुतिः तयादेशितं विहितमित्यर्थः ॥ आक्षिप्यते लक्ष्यते

पंडित शाब्दीति न्यायादिति भावः शक्त्यैव कथं न तदुपस्थितिरत आह नत्विति हेतुमाह वि।
शेष्यमिति विशेषणोपस्थितावेव शक्तेरुपक्षयात् तया द्विशेष्योपस्थितिरित्यर्थः विशि
ष्टशक्तिग्रहो हि विशेषणे ज्ञाते वाच्यं तत्र प्रमाणांतराभावाद्वेतत्पदजन्यमेवेति प्रथमो
२२ पस्थितत्वाद्विशेषणमात्रे पदानां न्नागृहीतिविशेषणान्यायेन शक्तिरिति परेषामभि
दू प्रायः ॥ दूषयति नो द्वाहाण्यैति युक्तिमाह नहीति कथं तर्हि व्यक्तेरुपस्थितिरत आह व्यक्ती
ति आक्षिप्यते अनुमीयते तथा चामानांतरस्तद्भ्यभ्यत्वान्नस्तद्भ्रणेत्यर्थः अनुमेयस्यापि।
स्य शाब्दबोधविषयत्वमित्यत्र लोकसिद्धं दृष्टांतमाह यथेति कर्तृकर्मणोरिव कर्मक्रि
ययोरप्याक्षेपे दृष्टांतयति अविशापिंडीति अत्रोपस्थितपदार्थयोः परस्परमयोग्यत्वा २२
न्नान्वय इति भावः ननु पीनो देवदत्त इत्यादौ भोजनाभाववतः पीनत्वबाधः रात्रिभोजने
न च पीनत्वस्य सामानाधिकरण्यं संबंधः भोजनरहितस्यापि पीनत्वमित्युक्तेष्वपि प्रती।
तिः फलमिति मुख्यार्थबाधादिसत्वाल्लक्षणेति शंकते पीनो देवदत्त इति ॥ दूषयति। राजटी०

नलक्ष्यत इति हेतुमाह श्रुतार्थापत्तेरिति तथा चान्यलक्ष्यत्वान्नात्रापि लक्षणेत्यर्थः ॥ प
त्रयोग्यताघटकः संबंधः शाब्दः कल्प्यते सा श्रुतार्थापत्तिर्य्यत्र तु न तथाति दर्थापत्तिमा-
त्रमिति रात्रिभोजनं लक्ष्यत इति निषेधरहितोपि क्वचित्पाठः स तु प्रामादिकः ॥ द्वितीय
मुदाहरति गंगायामिति स्वार्थमर्प्ययति स्वार्थत्वं करोति लक्षणे स्वार्थं जहातीति यावत् ॥
शुद्धैवेति व्याचष्टे उभयरूपा चेति शुद्धा सादृश्यभिन्नसंबंधरूपा उपचारेण उद्देश्यवि
धेयभावेन गौरयमित्यादि साध्यवसानायामपि तादात्म्यस्य विधेयत्वादिति भावः ॥ स्व
यं व्यावर्त्तकमभिधाय परोक्तं दूषयितुं सुपन्यस्यति अनयोरिति कुंताः प्रविशंति गंग
यां घोष इत्येतयोर्भेदयोस्तटस्थं लक्ष्यलक्षकपदार्थयोरभेदभंजनाभावात् न भेद
रूपं न व्यावर्त्तकं गौर्वाहीक इत्यादावभेदजनं प्रकृतभेदयोस्तु न तदिति परेषामभि
प्रायः ॥ प्रकृतेपि लक्ष्यलक्षकयोरभेदभानमावश्यकमिति दूषयति तटादीनामि-
ति तत्त्वप्रतिपत्तौ तादात्म्यप्रतिपत्तौ प्रतिपिपादयिषितेति स्रोतोवृत्तिशैत्यपावनत्वा

पंडित देस्तीरवृत्तितया प्रतीतिः प्रयोजनं तदास्याद्यदि पूरत्वेन तीरभानं भवेदित्यर्थः तदप्रती
तौतु लक्षणावैफल्यप्रसंगादिति भावः ॥ अन्वयमुक्त्वा व्यतिरेकमाह गंगासंबंधेतिगं
गायां संबंधोत्रेति तथा तटादितटत्वेन तटमात्रप्रतीतावित्यर्थः भेदाविशेषः केचित्तु
२३ भिन्नत्वेन प्रतीयमानयोरभेदारोपणमुपचारः तदभावादित्यर्थः भिन्नत्वेन प्रतीयमा
नत्वं च भिन्नार्थकशब्दप्रतिपाद्यत्वेन प्रतीयमानत्वं गौणप्रभेदेषु गोवाहीकशब्दप्रति
पाद्यानामभेदारोपणं प्रकृते तु लक्ष्यलक्षकोभयोपस्थापकपदाभावादुपचार इ
ति एतदुपपादयति अनयोरित्यादि भेदरूपं भेदगर्भं ताटस्थ्यमारोपः तथा चाभेदा
रोपेपि भिन्नत्वेन प्रतीतेरभावादुपचाराभावो हेतुरविकल भाव इति भाव इत्या २३
हुः ॥ अत्रेदं चिंतनीयं ॥ आयुरेवेदमित्यादि गौणसाध्यवसानभेदे हेतुर्व्यभिचारी न
हि तत्र भिन्नार्थकशब्दप्रतिपाद्यमानताद्वयोः तादृक् शब्दाभावात् न चेदं शब्दस्तथ
तस्याव्यावर्तकधर्मावच्छेदेनैव धर्म्युपस्थापकत्वात् तस्यापि परिहारे आयुरेताव राजटी०

दुपादाने तथाप्यप्रतीकाराच्च कमलमनं भसीत्यादिषु बहुषु स्थलेषु तथा दर्शनादिति॥
तदयन्निर्गलितार्थः गंगायां घोष इत्यादौ सर्वत्र लक्षणया पूरत्वादिशक्यतावच्छेदक
प्रकारके तीरादिलक्ष्योपस्थितिरत एव तत्त्वप्रतीतावितिरक्तिः अत एव च प्रयोजन
प्रतीतिरपि व्यंजनया लक्ष्येन च पूरत्वेनोपस्थिते तीरेऽयोग्यात्कथं घोषान्वय इति शं
कापूरत्वेनापि योग्यस्य तीरस्य स्मरणेन ज्ञानस्य विरोधितायां समानविषयत्वस्य निय
ामकत्वात् स्वार्थादन्येनेनेत्यादिकमौत्सर्गिकं प्रकृतानुपपत्तेः न चासंसर्गग्रहे पूर
त्वेन कथं तीरप्रतीतिरिति वाच्यं आहार्यारोपे इच्छाया इवात्र लक्षणायाः स्वभावस्य निय
मकत्वात् अत एव मुखं चंद्र इत्यादावभेदान्वयबोधः सकलसिद्धः तदुक्तं अत्यंतासत्य
पि ह्यर्थे ज्ञानं शब्दः करोति हीति संप्रदायविदः मिश्रास्तु शक्यतावच्छेदकमन्तर्लक्षणता।
वच्छेदकं येन प्रकारेणोपस्थिते शक्यसंबंधो गृह्यते तेनैव पदार्थस्मरणनियमात् संबं।
धितावच्छेदकरूपेणानुभवस्य तत्प्रकारस्मृतिजननएवासामर्थ्यात् तस्यैव वृत्तितावच्छे

पंडित दकत्वं स च शक्यतावच्छेदकभिन्न एवेति किंचान्वयविरोधिना रूपेण पूरत्वेनोपस्थिते
तीरे कथं घोषवासान्वयः अयोग्यताज्ञानसत्वात् पूरभेदभानात् अत पूरत्वस्य तीरे इति
तयाभानमपि न असंसर्गाग्रहात् न च परस्परासंबंधेन परस्पराभाने भेदभाननियमा
२५ त् अत एव स्वार्थादन्येनेत्यादिकमपि नोत्सर्गिकं नापि लक्षणास्वभावः तद्धि नापि सामं
जस्यात् मुखं चंद्र इत्यादौ मुखचंद्रसदृशयोरभेद एव तत्र हि गौण्या चंद्रपदस्य चंद्रस
दृशपरत्वात् सत्यपीत्यादि पृष्ठतया शंकामात्रं ॥ ग्रंथस्त्वेवं व्याख्येयः प्रतिपादन इति
सतिसप्तमी तत्वप्रतिपत्ताविति निमित्ते तथा च तत्वप्रतिपत्तिनिमित्तं गंगादिशब्देन लक्ष
णया तीरे तीरत्वादिनैवोपस्थापिते लक्षणामूलव्यंजनया तत्वप्रतिपत्तौ जनितायां २५
प्रतिपिपादयिषितस्य प्रयोजनस्य पावनत्वादेः प्रतीतिः संपद्यते न च भेदग्रहे व्यंज
नया कथं तदुपपत्तिरिति वाच्यं धर्मिणो भेदग्रहेपि धर्म्मयोरभेदग्रहे बाधकाभा
वात् व्यक्तिभेदे भासमानेऽभेदावगमस्य धर्माभेदविषयत्वमिति सर्वसम्मतत्वाच्च। राजटी०

अजहत्स्वार्थायामपि कुंतत्वादिना कुंतपुरुषसंयोगादिस्तत्तावच्छेदकं किंतु।
कुंतादिकमेव पदजन्यप्रतीतिप्रकारकत्वात् अजहत्स्वार्थायामुभयसाधारण्ये रूपं ल
क्ष्यतावच्छेदकमिति तु रहस्यं अन्यथा द्रव्यपरे नीलादिपदे नीलो गुणः प्रकारतया न प्र
तीयेत न च प्रतीयेत नीलोत्पलयोः सामानाधिकरण्यं न च स्वार्थादन्येन त्यादेर्विरोध
: तस्य शक्यतावच्छेदकं लक्ष्यतावच्छेदकत्वमपि भवतीति तिनात्पर्यान् तथा नियमस्य प्रवृ
त्त्यनपायात् नहि शक्यं शक्यतावच्छेदकमिति तात्पर्यादिति संक्षेपः॥ प्रकृतोपयो
गात्सप्रयोजनलक्षणायाः प्रभेदांतरमाह सारोपेति अन्येति पूर्वभेदद्वयव्यवच्छेदः
तथेत्यस्य व्याख्यानं अनपह्नुतभेदौ अतः साध्यवसानभेदाद्भेद इति भावः॥ उक्तेऽ
ति व्याचष्टे सामानाधिकरण्येन निर्दिश्येते इति तथा चात्र विजातीयद्रव्यवचनयोः
सामानाधिकरण्येन विशेषणविशेष्यभावानुपपत्तिर्लक्षणाबीजमिति भावः॥ भ
भेदांतरमाह विषयीति आरोप्यमाणस्योत्कटत्वात्तद्वाचकपदेनैवारोपविषयस्या

त

पंडित प्युपस्थापनमंतःस्वतत्वेंदुक्तंनिगीर्णइतिननुतद्वेदकद्वयंगोणत्वंप्रसक्तमतआह भेद
ाविमावितितथाचतत्रप्रसक्तिरिष्टैवेतिभावः॥एवंचसतिपरस्परव्यावर्तकमाह सादृ
श्यादितिगोणत्वेविशेषितिव्याचष्टे सादृश्यहेतिसादृश्यंयहेतुर्ययोस्ताविति बहुव्रीहिः गोणसा
२५ रोपसाध्यवसानभेदावुदाहरति गौर्वाहीकइत्यादि अन्येषांमतमवतारयति अत्रेति।
स्वार्थसहचारिणः स्वार्थवृत्तयः गोशब्दोलक्षणयाजात्यादिकमुपस्थापयति ततस्तत।
न्निमित्तीकृत्यवाहीकमभिधत्तइत्यर्थः अनुपपन्नस्यार्थंपक्षोलघुशान्वयकल्पने मा
नाभावात् गोपदस्यवाहीकेपिशक्तिकल्पनेगौरवादतोमतांतरमाह स्वार्थेति अभेदेन
साजात्येनएतत्त्वसंबंधप्रदर्शनार्थंगुणाएवेति परार्थास्त्वाक्षिप्यंतइत्यर्थः॥परार्थस्य २५
पदादनुपस्थितेर्विभक्त्यर्थस्यानन्वयप्रसंगात् आक्षेपश्चनानुमितिर्व्याप्त्याद्यप्रतिसं
धानेपिजायमानत्वादितिसिद्धांतमाह साधारणेति तथाचसादृश्यरूपेणप्रकारेणवा।
हीकोलक्ष्यतइतिनकाप्यनुपपत्तिरितिभावः॥केचित्तुगौणीलक्षणातोभिन्नांवद। राजटी॰

त्तिम्मन्यंते तन्मतनिराकरणाय सामान्यलक्षणप्रदर्शनपूर्वकं गौण्या लक्षणाविशेषं द-
र्शयति । अभिधेयेति प्रतीतिर्यस्मात्स व्यापारो लक्षणेति पूर्ववत्तत्तथा चैतद्रूपसत्वं कौ-
नीलक्षणैवेति भावः ॥ एवं सत्यवांतरविशेषमाह लक्ष्यमाणेति लक्ष्यमाणये जात्याद्य-
यस्तेर्योगात्कर्मणि पंचमी योगाद्वाप्येत्यर्थः गुणवत्तया लक्ष्यमाणैर्योगात्प्रतिपाद्यप्र-
तिपादकभावरूपादित्यप्याहुः ॥ नांतरीयकत्वं व्याप्तिः न स्यात् व्याप्त्यभावादित्यर्थः ननु
तत्कालावच्छेदेन व्याप्तिरस्त्येवेत्यत आह अविनाभावे चेति न च संबंधमात्रस्य तथा-
त्वेति प्रसंगस्तात्पर्यविशेषस्य नियामकत्वादिति भावः ॥ उक्तमिति आक्षेपलभ्या व्यक्ति-
रिति ये वदंति तैरिति शेषः ॥ शुद्धसारोपसाध्यवसाने दर्शयति आयुर्घृतमिति संबंधांत-
रत इति व्याचष्टे सादृश्यादन्यदिति लक्षणपूर्वसंबंधपूर्वं भेदचतुष्टयेपि प्रयोजनवत्वं
यथाक्रमं दर्शयति अत्रेत्यादि भेदेपीतीदमुभयत्रान्वयि ताद्रूप्यप्रतीतिरिति यद्यपि ता-
द्रूप्यप्रतीतिरन्वयबोध एव न तु प्रयोजनं तथापि प्रयोजनं प्रतिपादयतीति शेषः

पंडित इत्याह ॥ तादूप्यप्रतीतिस्तद्धर्म्मप्रतीतिः स च धर्म्मो इत्यादिरितिनानुपपत्तिरितिपरम वत्व
ार्थः वस्तुतउ भेदवति धर्म्मियोर्भेदेपि तादूप्यप्रतीतिरभेदप्रतीतिः प्रयोजनमित्यर्थः ॥
कार्यकारणभावादीत्यादिपदग्राह्यसंबंधभेदानाह क्वचिदित्यादिना तद्भेत्यं ते हि न
२६ उपचारः लक्षणा न तद्रूपाकारविशेषः एतेषु चेष्ठप्रदत्वात्संघनीयत्वनुवर्तनाधिक्यने ।
पुण्यातिरेक प्रतीतिः प्रयोजनं यथाक्रममवगंतव्यं प्रव्यवहितविभागस्यास्पत्वाद
ाह प्रायभेदाभ्यामिति उपादानलक्षणरूपाभ्यामित्यर्थः तथा चैतद्वयं गौणसारोप
साध्यवसानशुद्धसारोपसाध्यवसानरूपमुपाधिचतुष्कमिति षड्विधत्वमिति भावः
॥ सप्रयोजनलक्षणाया एवायं विभागो ऽतो न निरूढिलक्षणमादाय सप्तत्वाशंका । २६
पीतिद्वयं ॥ सेति लक्षणमात्रं प्रकृतोपयोगमाह व्यंग्येनेति तथा चाव्यंग्या सव्यंग्य
ा चेति प्रथमो विभागः ॥ ननु प्रयोजनस्य व्यंग्यत्वे किं प्रमाणमत आह प्रयोजने ।
हीति वक्ष्यमाणयुक्तेरिति भावः एवं सति सप्रयोजनभेदषट्कस्य व्यंग्यभेदाभेद राजटी०

माह तच्चेति तथा च व्यंग्यस्यैव द्विविधात्व प्रयोजनाद्द्वादश भेदा एकानिः प्रयोजनेति
त्रयोदशभेदा इत्यर्थः गूढं सहृदयैकवेद्यं ऽगूढं सहृदयासहृदयसाधारणं ॥ मुख
मित्यादि ऽत्र विकाशः कुसुमधर्म्मः स्मितेनुपपद्यमानः सातिशयत्वं लक्षयति स्म
संकुचितत्वं सादृश्यं लोकोत्तरचमत्कारकारित्वं व्यंग्यं वशितत्वं चेतनधर्ममतेन ।
स्वाधीनत्वं लक्ष्यते तेन चाभिमतविषयप्रवृत्त्या युक्तानुवाशित्वं व्यज्यते समुद्दलनं
मूर्त्तधर्मस्तेन बाहुल्यं लक्ष्यते तेन चानयोसरशीकारित्वं व्यंग्यं संस्थामर्य्यादातद्वा
पासनं चेतनधर्मस्तेनास्वाधीनत्वं लक्ष्यता ऽनुरागातिशयो व्यज्यते एवं चालिं
गनयोग्यत्वं रमणीयत्वं स्पृहनीयत्वं च गूढव्यंग्यानि ॥ उपदिशतीति ऽज्ञातज्ञाप
कशब्दविशेषप्रयोक्तृत्वं यौवनमदे ऽनुपपद्यमानमाविष्कारं लक्षयति तेन
चानायासशिक्षणं व्यज्यत इत्यर्थः स्फुटं प्रतीयते तेन तथा च सहृदयासहृदयवेद्य
मिति भावः ॥ सप्रयोजनलक्षणोपसंहारक्रमन्निराकरोति ऽव्यंग्येति तथा च नि।

पंडित ष्टि लक्षणमाद्यायां विभाग इति भावः ॥ विशेष्याभावानपूरयति शाब्द इति संबध्य
ते प्रकरणवशादित्यर्थः जनकत्वं बाधितमत आह तदश्रय इति यद्यपि वाचकाति
व्याप्तमेतत् तथाप्युपधेयसंकरेप्युपाधेरसंकरादिति भावः ॥ लक्षणया ऽनंतरोक्त
२७ त्वान्नमुख्यामात्रैव्यंजनायां व्यवस्थापयति तत्रेति तत्र लक्षणैकव्यंग्योपस्थितिहे
27 तुव्यापारो व्यंजनात्मक इत्यर्थः ॥ तत्र प्रयोजन इत्यप्याहुः उक्तमेवार्थमर्थापत्त्याद्र
ढयति यस्येति नहि गंगातीरे घोष इति बहुमेव वक्ता न जानाति ऽप्रथवैतस्मा[illegible]द्दा
दयमर्थः प्रतीयत एव नयेन लक्षणया प्रयोगं कुर्यादिति भावः न कुर्याद्यदि नप्र
योजनं प्रतिपिपादयिषुरिति शेषः शाब्दैकगम्य इति तथा च नानुमानिकी तत्प्र २७
तीतिः व्याप्त्यादिज्ञानानपेक्षणादिति भावः ॥ शाब्दैकगम्य इति व्याचष्टे नान्यत इति
क्रियेति व्याचष्टे व्यापार इति न परे त्युक्तं विषदयति तथाहीति ॥ मास्तु शक्तिर्ल
क्षणेरस्यान्तत्राह हेत्वभावादिति एतदेव व्युत्पादयति तथा चेति तथाहीत्यर्थः ल राजटी०

द्यंन मुख्यमिति लक्ष्यबोधानंतरं लक्षणया प्रयोजनप्रतीतिर्लक्ष्यार्थबाधमपेक्ष्य।
जायमाना न तदा स्यात् यदि तटं मुख्यार्थः स्यान्न चैवमित्यर्थः ॥ ज्ञाप्यार्थबाध एव तद्बी
जमिति चेत्तत्राह नापीति । अत्र लक्ष्येन ननु नान्यथानुपपत्त्या लक्षणादत आह योग
इति ननु यथा कथंचित्परस्परयापि संबंधः स्यादत आह नाप्रयोजनमिति तदेतद्व्या
चष्टे यथेत्यादि व्याख्यानप्रायं न च शब्द इत्यादि व्याचष्टे नापि गंगेति यथा गंगाशब्दो
लक्षणया तटं प्रतिपादयति न तथा प्रयोजनमित्यर्थः तथा च तत्र व्यापारांतरमेषित
व्यमिति भावः ॥ क्वचित्प्रतिपादयितुं समर्थ एवेति पाठस्तत्र नञ्द्वयेन समर्थ एवेत्य
र्थः तथा च मुख्यार्थबाधाद्यभावेपि तत्प्रतीतौ शब्दस्य सामर्थ्यव्यापारांतरमंगीकर्त
व्यमिति भावः ॥ नन्वस्तु प्रयोजनेपि प्रयोजनांतरं को दोष इत्यत आह एवमपीति किं
तयापीत्याशंक्याह मूललक्षणेति एतद्व्याचष्टे प्रकृतप्रतीति कृदिति तथा च प्रयो
जनप्रयोजनप्रतीतावेकत्रैव पुरुषायुषपर्यवसाने प्रतीतौ प्रयोजनज्ञानाभा

पंडित वाच्यत्वरूपेणैव नस्यादिति भावः ननु पावनत्वादिविशिष्टस्य तत्त्वप्रतीते किं प्रयोजनम
त॰ आह गंगायामिति गंगातटे घोष इत्यनेन तटमात्रे घोषप्रतीतिः गंगायामित्यने
न पावनत्वादिविशिष्टे तत्प्रतीतिरेव तदेव प्रयोजनमित्यर्थः प्रयोजनेनेति॰ अन्व
२९ यानुपपत्त्या हि लक्षणा सा च पावनत्वादिनानुपपत्तिस्तावदेव कल्पयति तच्च तीरम
त्रं न तु पावनत्वादिकमपि तेन विनानुपपत्त्यभावात् तस्य वासाधिकरणत्वाभाव
ाच्च यथा कथंचिद्योग्यत्वे किं तेन लक्षितेनापीति भावः ॥ युक्तिमाह ज्ञानस्येति ज्ञा
यते ऽनेनेति ज्ञानं करणं तथा च ज्ञानस्य लक्षणाया विषयस्तीरमात्रं फलं तु पाव
नत्वादि अत एवाह प्रत्यक्षादेरिति प्रत्यक्षादेः करणस्य विषयो नीलादि फलं । २९
धारा२ ज्ञानत्वं वा प्रकटता ज्ञाततेति घटो घट इति प्रत्ययानुरोधात् ज्ञानेन ज्ञातता ख्या
धर्मो विषये जन्यत इति भट्टाः इदं चानुपपन्नं अतीतानागतयोर्विषयस्याजना।
कत्वात् स्वरूपेणैव तद्व्यवहारोपपत्तौ वर्तमानेपि तत एव तदुपपत्तेरिति मतांतर राजटी॰

माह संवित्तिर्वेति सम्यग्वित्तिः संवित्तिरर्थव्यवसायस्तस्य प्रामाण्ये नियमादिति भावः
॥ यद्वा व्याप्तिज्ञानं तथा च ज्ञानस्य लक्षणाजनस्य विषयः तीरादिः फलं पावनत्वादि
अन्यदिति अत्र पक्षे दृष्टान्ते प्रत्यक्षं ज्ञानं तत्रापि पावनत्वादेः फलीभूतज्ञानविष
यतया फलत्वं ज्ञानशक्तौ विषये पदशक्यत्ववदिति सारं ॥ यदि न लक्षणा तर्हि क
थं धर्मिणः प्रतीतिरत आह विशेषा इति स्युः ज्ञायन्ते ॥ ज्ञानविषया इति शेष इति के
चिन्न तथा च तज्ज्ञानं शक्त्यादिना अनुपपद्यमानं व्यापारान्तरं कल्पयतीत्यर्थः नात
पर्य्यविषयत्वं च यथा न व्यंग्यस्य तथाग्रे दर्शयिष्यत इति भावः ॥ अभिधामूलायां
व्यंग्यविशिष्टोपस्थितिः शंकास्पदमपि नेत्याशयेनाह अनेकार्थस्येति शब्दस्य वि
भज्यंतस्य संयोगाद्यैर्वाचकत्वे नियंत्रित इत्यर्थः ॥ वाचकत्वमन्वयप्रतियोग्युप
स्थापनानुकूला शक्तिः नियंत्रिणं नियमनं एकार्थमात्रस्मरणानुकूलत्वकरणं
वस्तुतस्तु एकमात्रान्वयबोधानुकूलत्वकरणं नानार्थस्मरणमुभयोरपीति सि

पंडित

२६

29

ह्मात्। ऽवाच्यत्वं शक्त्याऽप्रतिपाद्यत्वं तदपि तत्कालेतावच्छेदेन तथा च द्वितीयार्थप्रती
तिरन्यथानुपपद्यमाना व्यंजनां कल्पयतीति भावः॥ न च तत्र तात्पर्यसत्वे शक्तिरे
व ऽन्यथा व्यंजनापि न तदुक्तं तात्पर्याद्धि वृत्तिकल्पनमिति सांप्रतं॥ एवं पादमे
कदा एकजातीययावृत्त्या एकमेवार्थमुपस्थापयतीति पदस्वाभाव्यादिति संक्षेपः॥
स्वोक्ते वृत्तिसंमतिं दर्शयन संयोगादीनाह संयोग इत्यादि तन्निष्ठतया प्रसिद्धस्य गु
णविशेषः संयोगः संयोगध्वंसो विप्रयोगः ऽतत एव तत्सामानाधिकरण्यनियमः स
हचरत्वेन प्रसिद्धिः साहचर्यं वध्यघातकभावः सहानवस्थितिर्वा विरोधः प्रयोजन
मर्थः संवोध्यत्वेन वुद्धिविशेषः प्रकरणं ऽपरार्थव्यावर्तको धर्मो लिंगं नियतार्थका
न्यशब्द सामानाधिकरण्यमन्यशब्दसन्निधिः कारणता सामर्थ्यं यत्नत्वमौचितीस्थ
ानं देशः दिनरूपः कालः स्त्रीपुन्नपुंसकादिव्यक्तिध्वनिविशेषो मानवादिस्वरः त
स्य काव्ये सविशेषोपस्थापकत्वामूदिति॥ यथाक्रममुदाहरति सशंखचक्र इति।

२६

राजटी०

घा

हरिशब्दस्य नानार्थत्वे शंखचक्रसंयोगतद्ध्वंसाभ्यां श्रीकृष्णे नियमनमित्यर्थः।
संयोगादेः साक्षाच्छब्दावृत्तित्वेऽपि परंपरया तद्धर्मवत्त्वं । अन्यथा वैयधिकरण्येनानि-
यामकत्वादिति बोध्यं तकविरोधमुदाहरति रामार्जुन इति सहानवस्थानेन तु छाया-
तपावुदाहर्यौ । अत्र छायापदं न कांतिमुपस्थापयति किं वा तपाभावमिति । अर्थ-
मुदाहरति स्थाणुमिति भवच्छेदनरूपप्रयोजनं भावादेव न वृक्षखंडादीत्यर्थः॥
अत्र च युष्मदर्थ इत्युपलक्षणं तेन बुद्धिविशेष एव नियामकोऽतोत्रैव सदेवः सर्वं
जानातीत्यत्रापि नियमनमिति ॥ लिंगमुदाहरति कुपित इति कोपस्य जनेनधिव्या-

म

वृत्तत्वान्मकरध्वजशब्दस्य कोपपरत्वमित्यर्थः॥ वस्तुतस्तु मकरध्वजशब्दस्य मन्-
मथपरतायां प्रसिद्धिरेव नियामिका । अत एव मकरध्वजनियमितेत्यादौ निहता-
र्थत्वं वक्ष्यति कोपस्यान्यसाधारण्येनालिंगत्वाच्च तस्मात्कुपितशब्द एव मकरध्व-
जेन लिंगेन मन्मथे नियम्यत इत्यर्थः॥ सामर्थ्यमुदाहरति मधुना मत्त इति कोकि-

पंडित

लमदकारणेनावसंतस्येरितिमधुपदं वसंतेनियम्यत इत्यर्थः ग्रोचितेतीमुदाहरति
पातुवो दयितामुखमितिहिताहितप्राप्तिपरीहारफलस्य पालनस्य दयितामुखास
ाध्यत्वान्न सा मुख्यमात्रे पालनशब्दो नियम्यत इत्यर्थः॥ न चात्र सामर्थ्यशंकाहेतुत्व
ाप्रतिसंधानेपिनियमनादितिभावः॥ देशमुदाहरति भात्यत्रेति शिवालयादौ॥
३० परमेश्वरपदं शिवावादावेव नियतमित्यर्थः कालमुदाहरति चित्रभानुरिति व्यक्ति
30 मुदाहरति मित्रमिति इंद्रशत्रुरिति इंद्रशत्रोर्विवर्धस्व इत्यत्र यदि ग्रंतोदात्तत्वं
तदा षष्ठीसमासे उत्तरपदप्राधान्यो इंद्रस्य शातयिता लभ्यते समासांते चेत्यनेन
षष्ठीसमासे इंद्रः शत्रुर्लभ्यते प्रकृत्या पूर्वपदमित्यनेन पूर्वपद बहुव्रीहावाद्यु ३०
दात्तत्वाभिधानात् एवं न काव्य इत्यर्थः यद्यपि काव्येपि कार्यादि गुरुः॥ स्वेदमित्य = व्या२
ादावर्थविशेषप्रतीति प्रयोजकत्वं वक्ष्यत एव तथापि यथा वेदे स्वरस्यार्थवि
शेषप्रतीतौ बाहुल्यं न तथा काव्ये ग्रत एवोक्तं वेद इव न काव्य इति परमार्थः॥ राजटी०

एदहमेत्रेति एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपत्राभ्यामेतावन्मात्रावस्था एता-
न्मात्रैर्दिवसैः अक्षिपत्राभ्यामिति तृतीयालक्षणे अत्र च एतावन्मात्रशब्दस्य बुद्धि-
वाचकतया नानार्थतुल्यकक्षतया अभिनयेन परिमाणविशेषनियमनं क्रियत इति
अभिनयादय इत्यत्रादिपदेनापदेशो गृह्यते यथेतः संदेश्यः प्राप्तश्रीणेतु एवाहेति कृतं
॥विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतं॥ अत्र छेदनसंवर्धनयोः सामानाधिकरण्येनु-
रोधात् स्वशब्देन इतः शब्द आत्मविशेषपरतया नियम्यत इत्याहुः॥ मद्वात्मन इति अत्र रा-
ज्ञः प्रस्तुतत्वात्प्रकरणेन यस्येति राजनि नियम्यते न त्र विशेषणानामर्थः समीचीनस्वभ-
ावस्यानभिभवनीयाकृतेः महाकुलप्रभवस्य कृतवाणसंग्रहस्य अनुपणीतज्ञानस्य स-
रत र्वगत्यर्था ज्ञानार्थाः वैरिनिवारणस्य त्यागज[illegible]सेकेन सततं सुभगः पाणिवमूदिति अ-
त्र च विशेषणपदानां नानार्थत्वाद्द्वितीयोर्थः प्रतीयते तद्यथा भद्र इति क[illegible]जाति रि
विशेषः तद्वात्मनः तज्जातीयस्य दुःखादिरोहनीयशरीरस्य विशालवंशावदुन्ना-

पंडित तस्यव्रूतभ्रमरसंग्रहस्य ऽअनुपक्रान्तगमनस्य श्रेष्ठकरिणः मदजलसेकसुभगः शुंडा
दंडोभूदित्याद्यर्थपर्य्यालोचनया ऽप्राकरणिकोपि करिरूपोर्थः प्रतीयते साचेयं शक्ते
र्नियमनात्प्रकारांतरेणानुपपद्यमाना व्यंजनामेव कल्पयतीति नानार्थव्यंजनासि
३१ द्धिरिति निर्गलितोर्थः ॥ ननु यदि शब्दस्य व्यंजनकत्वमर्थनैरपेक्ष्येण तर्हि जरगउद
शेत्यादिशब्दानां व्यंजकत्वापत्तिरत आह यदिति तर्हि कथमियं शब्दव्यंजनाऽइत्यत
ऽआह सहकारितयेति ऽअवच्छेदकतयेत्यर्थः तथा च प्राधान्येन व्यपदेशा भवंतीति
शब्दा व्यंजनेति भावः ॥ ॥ ॥ ॥ इति श्रीपंडितराजविरचितायां काव्यप्रकाश
टीकायां द्वितीयोल्लासः ॥ ॥ ॥ ॥ शब्दार्थयोर्व्यंजनाश्रयत्वेन काव्यत्वमित्युक्तं तत्र ३१
शब्दस्य व्यंजकत्वमुदाहृतं इदानीमर्थस्य व्यंजकत्वमुदाहर्तुमर्थानानुवदति ऽअर्था
इति यद्यपि सर्वेषां प्रायशोर्थानामित्यादिनार्थव्यंजकत्वमुदाहृतमेव तथापि तत्रा
लंकारेण संभववारणाय संप्रति तु प्राधान्येन सहकारिविशेषाभिधानेनेति न वैयर्थ्यं राजटी०

९४०